त्र॰प्राज्ञया चरेत् ॥ शववाहतीर्थगमसिंधुमज्जनक्षुर-
माचरेन्न खलु गर्भिणीपतिः ॥ ३५ ॥

ऋतुपाणिपीडेति ॥ ऋतौ यज्ञे तथा पाणिपीडो विवाहस्तत्र श्मश्रुकर्मादौ । मृतौ मातापित्रोर्मरणे । बंधमोक्षणे कारागृहे बद्धस्य मोक्षणे द्विजाज्ञया ब्राह्मणाज्ञया राजाज्ञया च दुष्टेऽपि वारनक्षत्रादौ क्षौरं चरेत्कुर्यात् । अन्यच्च । " गंगायां भास्करक्षेत्रे मातापित्रोर्मृतेऽहनि । आधाने सोमपाने च षट्सु क्षौरं विधीयते ॥ " अन्यच्च । " राजकार्यनियुक्तानां नटानां रूपजीविनाम् । श्मश्रुरोमनखच्छेदे नास्ति कालविशोधनम् ॥ " इति । अथ शवेति । गर्भिणी गर्भवती तस्याः भर्ता शववाहं मृतकवहनं तीर्थगमं तीर्थयात्रायाम् उपलक्षणत्वाद्विदेशगमनमपि सिंधुमज्जनं समुद्रस्नानं क्षुरं क्षुरकर्म एतानि कर्माणि नाचरेन्न कुर्यात् । उक्तं च । " सिंधुस्नानं द्रुमच्छेदं वमनप्रेतवाहनम् । विदेशगमनं चैव न कुर्याद्गर्भिणीपतिः ॥ राजा योगी पुरंध्री च मातापित्रोस्तु जीवतोः । मुंडनं सर्वतीर्थेषु न कुर्याद्गर्भिणीपतिः ॥ " नारदः । " वपनं मैथुनं तीर्थं वर्जयेद्गर्भिणीपतिः । श्राद्धं च सप्तमान्मासादूर्ध्वं नान्यत्र वेदवित् ॥ " ॥ ३५ ॥

अथ राज्ञां क्षौरे विशेषं सर्वथा वर्ज्यनक्षत्राणि च भुजंगप्रयातेनाह—

नृपाणां हितं क्षौरभे श्मश्रुकर्म दिने पंचमे पंचमेऽस्योदये वा ॥ षडग्निस्त्रिमैत्रोऽष्टकः पंचपित्र्योऽद्रतोऽक्ष्यर्यमा क्षौरकृन्मृत्युमेति ॥ ३६ ॥

नृपाणामिति ॥ नृपाणां पंचमे पंचमे दिने क्षौरनक्षत्रे श्मश्रुकर्म हितं स्यात् । पंचमे दिने यदि क्षौरनक्षत्राभावस्तदर्थमाह । अस्योदये वेति । अथवाऽस्य क्षौरभस्य उदये श्मश्रुकर्म कार्यम् । उदयशब्देन तन्नक्षत्रस्य स्वामिनो मुहूर्तः । तथा च गर्गः । " क्षौरकर्म मही-

शानां पंचमे पंचमेऽहनि । कर्तव्यं क्षौरनक्षत्रेऽप्यथवा तन्मुहूर्त्तके ॥"
इति । उत्पलेन तु वाराहपद्यव्याख्यानावसरे अस्य उदये अ...
क्षौरभस्य उदये लग्ने इति व्याख्यातम् । तथा मेषलग्नं त्रिंशद्भागा-
त्मकं तत्राद्यास्त्रयोदश भागा विंशतिकलाधिका यावता कालेन
मेषलग्ने उदयं यांति तावदश्विनीनक्षत्रमुदयं यातीति । तदनंतरं
तावंत एवांशा यावता कालेनोदयं यांति तावद्भरण्युदय इत्यनेन
न्यायेन सर्वेषां नक्षत्राणामुदया ज्ञेयाः । भ्रातरस्तु एवं व्याकुर्वते ।
यस्मिन्काले अश्विन्या उदयः क्षितिजसंबंधः संपद्यते तं समयमा-
रभ्य यावद्भरण्या उदयः क्षितिजसंबंधस्तदंतरे यावान्कालः सोऽश्वि-
न्या उदय उच्यते । एवं सत्युदयलग्नद्वयांशांतरालाद्गणितमार्गेण
यावानिष्टकाल आगच्छेत्स एव तन्नक्षत्रोदय इति निष्कृष्टोऽर्थः ।
षडग्निरिति । अग्निः कृत्तिका क्षौरावृत्त्या षड्वारं कृत्तिका यस्य सः
एवं त्रीणि मैत्राण्यनुराधा यस्य । अष्टौ का रोहिण्यो यस्य । पंच
पित्र्याणि मघा यस्य । अब्धयश्चत्वारोऽर्यमण उत्तराफाल्गुन्यो
यस्य स एतादृशः क्षौरकृदब्दतो वर्षानंतरं मृत्युं मरणमेति प्राप्नोति ।
वसिष्ठः । " अष्टाब्जऋक्षः पितृपंचकश्च षड्वह्निधिष्ण्यश्चतुरर्यमर्क्षः ।
त्रिमैत्रभः पद्मजसन्निभोऽपि क्षौरी नरोऽब्दान्निधनं गतः सः ॥ "
इति क्षौरम् ॥ ३६ ॥

अथ प्राप्तकालत्वादक्षरारंभमुहूर्त्तं पंचचामरच्छंदसाऽऽह—

गणेशविष्णुवाग्रमाः प्रपूज्य पंचमाब्दके तिथौ
शिवार्कदिग्द्विषट्शरत्रिके रवावुदक् ॥ लघुश्रवो-
निलांत्यभादितीशतक्षमित्रभे चरे न सत्तनौ
शिशोर्लिपिग्रहः सतां दिने ॥ ३७ ॥

गणेशेति ॥ गणेशविष्णू प्रसिद्धौ वाक्सरस्वती रमा लक्ष्मीः
एता देवताः प्रपूज्य पंचमे वर्षे सति शिव एकादशी द्वादशी
दशमी द्वितीया षष्ठी पंचमी तृतीया आसामन्यतमतिथौ रवावुदगु-

त्तरायणगते सति। तथा लघुनक्षत्राणि हस्ताश्विपुष्याः श्रवणः स्वाती रेवती पुनर्वसुः ईश आर्द्रा तक्षा चित्रा मित्रमनुराधा एषामन्यतमनक्षत्रे सति। तथा सतां सोमज्ञगुरुशुक्राणां दिने दिवसे। तथा चरराशयो मेषकर्कतुलामकरास्तद्रहितशुभस्वामिके वृषमिथुनकन्याधनुर्मीनानामन्यतमे लग्ने सति शिशोर्लिपिग्रहो नूतनाक्षरालेखनप्रारंभः कार्यः॥ ३७॥

अथ विद्यारंभमुहूर्त्तं पंचचामरेणाह—

मृगात्कराच्छ्रुतेस्त्रयेऽश्विमूलपूर्विकात्रये गुरुद्वयेऽर्कजीववित्सितेऽह्नि षट्शरत्रिके॥ शिवार्कदिग्द्विके तिथौ ध्रुवांत्यमित्रभे परैः शुभैरधीतिरुत्तमा त्रिकोणकेंद्रगैः स्मृता॥ ३८॥

मृगादिति॥ मृगात्त्रये मृगार्द्रापुनर्वसुषु हस्तात्त्रये हस्तचित्रास्वातीषु श्रुतेः श्रवणधनिष्ठाशतभेषु अश्विन्यां मूले पूर्वात्रये गुरुद्वये पुष्याश्लेषयोः। तथा सूर्यगुरुबुधशुक्राणां दिने तथा षष्ठीपंचम्यादितिथिषु शुभैः केंद्रकोणगैः सद्भिः अधीतिः शुभा स्मृता। अधीतिरध्ययनम्। परैर्ध्रुवांत्यमित्रभे अधीतिः शुभा प्रोक्ता। इदं वचनं धनुर्विद्याविषयमिति दीपिकोक्तेः। विद्यारंभे श्रवणत्रयोपादानं महेश्वरादिमतात्। वसिष्ठादिभिः श्रवणस्य केवलस्योक्तत्वात्। इति विद्यारंभः॥ ३८॥

अथ व्रतबंध इति। विंशतिपद्यैः प्रोच्यते इति शेषः। तस्य त्रिविधोऽपि कालो नित्यः काम्यो गौणश्च क्रमेण तं शार्दूलविक्रीडितेनाह—

अथ व्रतबंधः।

विप्राणां व्रतबंधनं निगदितं गर्भाज्जनेर्वाष्टमे
वर्षे वाप्यथ पंचमे क्षितिभुजां षष्ठे तथैकादशे॥

वैश्यानां पुनरष्टमेऽप्यथ पुनः स्याद्द्वादशे वत्सरे
कालेऽथ द्विगुणे गते निगदिते गौणं तदाहुर्बुधाः ३९

विप्राणामिति ॥ गर्भादिनमारभ्याष्टमे सौरे वर्षेऽथवा जनेरुत्पत्तिदिनात्सौरवर्षेऽष्टमे सति विप्राणां व्रतबन्धनं नित्यं निगदितम् । अथ काम्यम् । विप्राणामेव गर्भाज्जनेर्वा पंचमे वर्षे कार्यम् । एवं क्षितिभुजां क्षत्रियाणां गर्भाज्जनेर्वा षष्ठे वर्षे काम्यम् । गर्भाज्जनेर्वा एकादशे सौरवर्षे नित्यम् । वैश्यानां पुनस्तथैवाष्टमे काम्यम् । तथैव गर्भाज्जनेर्वा द्वादशे नित्यम् । नारदः । "आधानादष्टमे वर्षे गर्भतो वाग्रजन्मनाम् । राज्ञामेकादशे मौंजीबन्धनं द्वादशे विशाम् ॥" इति । अत्र फलाश्रवणान्नित्यमित्यवसीयते । मनुः । "ब्रह्मवर्चसकामस्य कार्यं विप्रस्य पंचमे । राज्ञो बलार्थिनः षष्ठे वैश्यस्यार्थार्थिनोऽष्टमे ॥" अत्र फलश्रवणात्काम्यता । पैठीनसिना गर्भपंचमे व्रतबन्धनमुक्तम् । गर्भपंचमेऽब्दे ब्राह्मणमुपनयेदिति । गर्भषष्ठेऽष्टमे च क्षत्रियविशोर्ज्ञेयम् । गर्भादिसंख्या वर्षाणामिति स्मृतेश्च । आपस्तंबसूत्रे गर्भाष्टमेषु ब्राह्मणमुपनयेद्गर्भैकादशेषु राजन्यं गर्भद्वादशेषु वैश्यमिति । बहुत्वान्यथानुपपत्त्या गर्भषष्ठसप्तमाष्टमेष्विति वृत्तिकृद्व्याख्यानात्त्रयाणामपि नित्यकालता । एवं गर्भैकादशेष्वित्यादावपि व्याख्येयम् । एतच्छाखाध्यायिविषयं ज्ञेयम् । अथ गौणकाल उच्यते । निगदिते प्रोक्ते गर्भाज्जनेर्वाष्टमे इत्यादिके काले तस्मिन् द्विगुणे गते सति तद्व्रतबन्धनं गौणमाहुः । यथा ब्राह्मणस्य षोडशवर्षपर्यंतम् । क्षत्रियस्य द्वाविंशतिवर्षपर्यंतम् । वैश्यस्य चतुर्विंशतिवर्षपर्यंतं गौणमित्यर्थः । मनुः । "आषोडशाद्ब्राह्मणस्य सावित्री नाभिवर्तते । आद्वाविंशाद्ब्रह्मबंधोराचतुर्विंशतेर्विशः ॥ अत ऊर्ध्वं त्रयोऽप्येते यथाकालमसंस्कृताः । सावित्रीपतिता व्रात्या भवंत्यपि च गर्हिताः ॥" इति । केशवः । "स्वस्वमौंजीमुख्यकालाच्छ्रेष्ठमध्याधमाः समाः । तिस्रः केशवदैवज्ञैः प्रोक्ता मौंजीनिबंधने ॥" इति ॥ ३९ ॥

अथ व्रतबंधे नक्षत्रादिकं वसंततिलकयाह—

क्षिप्रध्रुवाहिचरमूलमृदुत्रिपूर्वा रौद्रेऽर्कविद्गुरुसि-तेंदुदिने व्रतं सत् ॥ द्वित्रीषु रुद्ररविदिक्प्रमिते तिथौ च कृष्णादिमत्रिलवकेऽपि न चापराह्णे ॥४०॥

क्षिप्रेति ॥ गीर्वाणांबुप्रतिष्ठेत्यादिना दक्षिणायननिषेधादुत्तरायणमासषट्कं प्रशस्तमिति मासानामुक्तत्वान्नक्षत्रादिकमेवोक्तम् । तत्र काश्यपः । "ऋतौ वसंते विप्राणां ग्रीष्मे राज्ञां शरद्यथ । विशां मुख्यं च सर्वेषां द्विजानां चोपनायनम् ॥ साधारणं च मासेषु माघादिषु च पंचसु ।" क्षिप्रेति । क्षिप्राणि हस्ताश्विपुष्याः । ध्रुवाणि रोहिण्युत्तरात्रयम् । अहिराश्लेषा । चराणि श्रवणधनिष्ठाशततारापुनर्वसुस्वात्यः । मूलम् । मृदूनि मृगरेवतीचित्रानुराधाः । तिस्रः पूर्वाः । रौद्रमार्द्रा । एषु द्वाविंशतिभेषु व्रतबंधनं सत् । उक्तं च । "प्राजापत्यादिषड्भक्षे भगर्क्षादिषु पंचसु । मूलादिदशके चैव समैत्रे व्रतबंधनम् ॥" इति । अर्थाद्भरणीकृत्तिकामघाविशाखाज्येष्ठासु न कार्यमित्यर्थः । एतानि सर्वशाखानक्षत्रभेलकाभिप्रायेणोक्तानि । क्वचित् ज्येष्ठाशततारापि गृहीता । श्रीपतिनिबंधे । "अश्विनीमृगचित्रासु हस्ते स्वात्यां च शक्रभे । पुष्ये च पूर्वाफल्गुन्यां श्रवणे पौष्णभे तथा ॥ वासवे शततारासु व्रतबंधः प्रशस्यते ।" भुजबलराजमार्त्तंडयोरपि । "हस्तत्रये दैत्यरिपुत्रये च शाक्रेन्दुपुष्याश्विनिरेवतीषु ।" इति । "हस्ते शक्राश्विचित्रादितिवसुवरुणोपेंद्रपुष्येंदुपौष्णस्वातीष्वव्याहतासु स्मृतमुपनयनं भार्गवाद्यैर्मुनींद्रैः ।" इति च । अर्केति । सूर्यबुधगुरुशुक्रचंद्रदिवसेषु व्रतं सत् । अर्थात् भौमशनी निषिद्धौ । नारदः । "आचार्यसौम्यकाव्यानां वाराः शस्ताः शशीनयोः । वारौ तौ मध्यफलदावितरौ निंदितौ व्रते ॥" तत्राप्यस्तंगतबुधस्य वारो वर्ज्यः । "अस्तंगतस्य सौम्यस्य वारो वर्ज्यो द्विजन्मनः ।" इति नारदोक्तेः । द्वित्रीष्विति । द्वितीयातृतीयापंचम्येकादशीद्वा-

दशीदशमीसंज्ञासु तिथिषु च व्रतं सत् स्यात् । नारदेन सप्तमीत्रयोदश्योः प्राशस्त्यमुक्तम् । तद्वसंताभिप्रायेणेति ज्ञेयम् । उक्तं च तेनैव । "विनर्त्तुना वसंतेन कृष्णपक्षे गलग्रहे । अपराह्णे चोपनीतः पुनः संस्कारमर्हति ॥" इति । कृष्णादिमेति । विहितमासानां कृष्णपक्षस्यादिमत्रिलवके पंचमीपर्यंतं व्रतं सत् । "त्यक्त्वा चतुर्थीमपि कृष्णपक्षे त्वाद्ये त्रिभागे शुभदं व्रतं सत्" इति वसिष्ठोक्तेः । न चेति । त्रिधा विभक्तदिनस्य त्रयो विभागाः क्रमेण पूर्वाह्णमध्याह्नापराह्णसंज्ञका भवंति । तत्रापराह्णभागे व्रतं न सत् । "अपराह्णे चोपनीतः पुनः संस्कारमर्हति ।" इति नारदोक्तेः । "त्रिधा विभज्य दिवसं तत्रादौ कर्म दैविकम् । द्वितीये मानुषं कार्यं तृतीयेंऽशे तु पैतृकम् ॥" इति नारदोक्तेः ॥ ४० ॥

अथ व्रतबंधे सामान्यतो लग्नभंगयोगं प्रमाणिकयाह––

कवीज्यचंद्रलग्नपा रिपौ मृतौ व्रतेऽधमाः ॥
व्ययेऽब्जभार्गवौ तथा तनौ मृतौ सुते खलाः ॥ ४१ ॥

कवीज्येति ॥ रिपौ षष्ठे मृतावष्टमस्थाने चेच्छुक्रगुरुचंद्रलग्नस्वामिनो भवंति तदा अधमा मरणकारकाः । अब्जभार्गवौ चंद्रशुक्रौ व्यये अधमौ । खलाः पापग्रहाः लग्नाष्टमपंचमस्थानेषु स्थिता अधमाः ॥ ४१ ॥

अथ सामान्यतो लग्नमनुष्टुभाह––

व्रतबंधेऽष्टषड्रिःफवर्जिताः शोभनाः शुभाः ॥
त्रिषडाये खलाः पूर्णो गोकर्कस्थो विधुस्तनौ ॥ ४२ ॥

व्रतबंध इति ॥ शुभग्रहाः अष्टमषष्ठद्वादशस्थानस्थिताश्चेत्स्युर्न शोभनाः । अन्यस्थाने व्रतबंधे शोभनाः । खलाः पापास्तृतीयषष्ठैकादशस्थानेषु शोभनाः स्युः । गोकर्केति । पूर्णः शुक्लपक्षीयो विधुर्वृषभस्थः कर्कस्थश्च तनौ यदि भवेत्तदा सन् शोभनः । नान्यथा । गुरुः । "चंद्रे लग्नेऽभिशस्तः स्यात्क्षयरोगी सितेतरे ।

शुक्लपक्षे भवेद्यज्वा स्वभे तुंगे विशेषतः ॥ " इति । कश्यपस्तूच्चस्थं चंद्रं सदैव न्यषेधत् । " वर्धमानोऽपि वा पूर्णश्चंद्रो यदि विलग्नगः । निःस्वं करोति व्रतिनं लग्नगः क्षयरोगिणम् ॥ " इति । उच्चस्थसंबंधिनोः पक्षयोर्देशाचारतो व्यवस्था स्वगृहगस्तूत्तमो मतद्वये॥४२॥

अथ वर्णेशशाखेशाञ्छालिन्याह—

विप्राधीशौ भार्गवेज्यौ कुजार्कौ राजन्यानामोषधीशो विशां च ॥ शूद्राणां ज्ञश्चांत्यजानां शनिः स्याच्छाखेशाः स्युर्जीवशुक्रारसौम्याः ॥ ४३ ॥

विप्राधीशाविति ॥ शुक्रबृहस्पती ब्राह्मणाधीशौ । भौमसूर्यौ क्षत्रियाणां स्वामिनौ "। औषधीशश्चंद्रो वैश्यानां स्वामी । बुधः शूद्राणां स्वामी । शनिरंत्यजानां चांडालानां स्वामी । " ऋग्वेदोऽथ यजुर्वेदः सामवेदो ह्यथर्वणः । " इति वेदक्रमाज्जीवशुक्रारसौम्याः शाखेशाः स्युः । ऋग्वेदस्य गुरुः । यजुषः शुक्रः । साम्नो भौमः । अथर्वणो बुधः स्वामी ॥ ४३ ॥

वर्णेशशाखेशयोः प्रयोजनं वसंततिलकयाह—

शाखेशवारतनुवीर्यमतीव शस्तं शाखेशसूर्यशशिजीवबले व्रतं सत् ॥ जीवे भृगौ रिपुगृहे विजिते च नीचे स्याद्वेदशास्त्रविधिना रहितो व्रतेन४४

शाखेशेति ॥ यः स्वशाखाधिपस्तस्य वारस्तनुर्लग्नं च । वीर्यं बलं गोचरप्रकारेण स्वगृहाद्यवस्थितत्वेन वा बलवत्त्वं च व्रतबंधेऽतीव शस्तम् । यथा गुरुः ऋग्वेदिनामीशोऽतो गुरुवारे गुरुलग्ने धनुर्मीनाख्ये गुरुबले च सति उपनयनमतीव शुभम् । एवं सर्वत्र विज्ञेयम् । नारदः । " शाखाधिपतिवारश्च शाखाधिपबलं शिशोः । शाखाधिपतिलग्नं च त्रितयं दुर्लभं व्रते ॥ " शाखेति । शाखा वेदस्तस्येशः स्वामी । तुल्यन्यायत्वाद्वर्णेशोऽपि ग्राह्यः । सूर्यशशिजीवाः प्रसिद्धाः । एषां बले सति व्रतं सत्स्यात् । अन्यथा नेत्यर्थः । जीवे इति । जीवे

भृगौ चकाराच्छाखेशे वर्णेशे वा विजिते युद्धे पराजिते नीचराशिस्थे च सति व्रतेनानुष्ठितेन सता वेदशास्त्रविधिना वेदो वेदाध्ययनं शास्त्रं शास्त्राध्ययनं विधिर्नित्यनैमित्तिकश्रौतस्मार्त्तकर्मानुष्ठानाख्यस्तेषां समाहारद्वंद्वस्तेन रहितो व्रती स्यात् । वसिष्ठः । "शाखेशगुरुशुक्राणां मौढ्ये बाल्ये च वार्द्धके । नैवोपनयनं कार्यं वर्णेशे दुर्बले सति ॥" इति । तेन भौमबुधयोरस्ते सामगाथर्वणशाखिनोरुपनयनादि न भवतीति तत्त्वम् । तत्र नीचाद्यवस्थितत्वेऽपि शाखेशादेः परिहारमाह वसिष्ठः । "शत्रुनीचाधिशत्रुस्थे स्वांशे वा स्वोच्चभागगे । शाखेशे वा गुरौ शुक्रे न नीचफलमश्नुते ॥" इति । शुक्रस्य शत्रुराशिस्थत्वं वृषभस्थेऽर्के कदाचित्संभवति । नीचगत्वं शरदि वैश्यमुपनयेदिति वैश्योपनयने संभवतीति ध्येयम् ॥ ४४ ॥

अथ जन्ममासादेः प्रतिप्रसवमाह—

जन्मर्क्षमासलग्नादौ व्रते विद्याधिको व्रती ॥
आद्यगर्भेऽपि विप्राणां क्षत्रादीनामनादिमे ॥ ४५ ॥

जन्मर्क्षेति ॥ जन्मनक्षत्रे जन्ममासे जन्मलग्ने आदिशब्देन जन्मतिथौ विप्राणां ब्राह्मणानामाद्यगर्भेऽपि । अपिशब्दात् द्वितीयगर्भादावपि व्रती बालो व्रते यज्ञोपवीते विद्याधिकः स्यात् । क्षत्रादीनां क्षत्रियवैश्यानां पुनरनादिमे द्वितीयगर्भादिबालके सति जन्मर्क्षमासलग्नादौ विद्याधिको व्रती स्यात् । आद्यगर्भे तु तेषां सर्वथा निषेध एव । शौनकः । "जन्मोदये जन्मसु तारकासु मासे तथा जन्मतिथौ च राशौ । व्रतेन विप्रोऽल्पपरिश्रुतोऽपि प्रज्ञाविशेषैः प्रथितः पृथिव्याम् ॥ गर्भाष्टमे गर्गपराशराद्यैः फलं यदुक्तं" व्रतबंधने तु । ततोऽधिकं जन्मसु तारकासु मासेऽथ वा जन्मनि वाडवानाम् ॥" वाडवानां विप्राणाम् । "द्विजात्यग्रजन्मभूदेववाडवाः ।" इत्यभिधानात् । प्रथमदशमैकोनविंशनक्षत्राणां ग्रहणार्थं जन्मसु तारकास्वित्युक्तम् । जन्ममासनिषेधस्तु आद्यगर्भविषयः क्षत्रियवैश्ययोः । विप्राणां तु वाडवानामिति विशेषोक्तेराद्यगर्भानाद्यगर्भ-

साधारणं जन्ममासे उपनयनम् । अतो जन्ममासादौ शस्तामिति ज्ञेयम् ॥ ४५ ॥

अथ गुरुबलमनुष्टुभाह—

बटुकन्याजन्मराशेस्त्रिकोणायद्विसप्तगः ॥
श्रेष्ठो गुरुः खषट्त्र्याद्ये पूजयाऽन्यत्र निंदितः॥४६॥

बटुकन्येति ॥ बटुरुपनयनाधिकारी तथा कन्या स्त्रीजात्यपत्यं तज्जन्मराशेर्नवमपंचमैकादशद्वितीयसप्तमस्थानस्थितो गुरुः श्रेष्ठ उत्तमः । दशषट्तृतीयप्रथमस्थानस्थितो गुरुः पूजया पूजाविधानेनानुष्ठितेन श्रेष्ठः । अन्यत्र चतुर्थाष्टमद्वादशस्थानस्थो निंद्यो निषिद्ध इत्यर्थः । नारदः । "बालस्य बलहीनोऽपि शांत्या जीवो बलप्रदः । यथोक्तवत्सरे कार्यमनुक्ते नोपनायनम् ॥ " वसिष्ठः । " उक्तेऽपि वर्षे न गुरुर्बली चेच्छांत्या प्रशस्तं व्रतबंधकर्म । अनुक्तवर्षे सुबलप्रदोऽपि नैवैतयोरब्दबलं गरीयः ॥ " इति । गर्गः । " व्रतबंधे विवाहे च प्रतिष्ठायां विशेषतः । गोचरेणैव कर्तव्यं वेधादिकमकारणम् ॥ " इति । वेधस्तु । " व्यये पक्षैस्त्रिगे शैलैः खगे नंदैः सुखे शरैः । रंध्रे रुद्रैर्ग्रहैर्विद्धो गुरुः शुद्धोऽशुभोऽन्यथा ॥ " प्राच्यास्तु गोचरबलाभावेऽष्टकवर्गबलमाहुः । राजमार्तंडः । " अष्टवर्गविशुद्धेषु गुरुशीतांशुभानुषु । व्रतोद्वाहौ तु कर्त्तव्यौ गोचरे न कदाचन ॥ " इति । अन्यच्च । " अष्टवर्गेण ये शुद्धास्ते शुद्धाः सर्वकर्मसु । सूक्ष्माष्टवर्गसंशुद्धिः स्थूला शुद्धिस्तु गोचरे ॥ " तत्र गुरोरष्टवर्गो बृहज्जातके । "दिक्स्वाद्याष्टमदायबंधुषु कुजात्स्वात्सत्रिकेष्वंगिराः सूर्यात्सत्रिनवेषुधीस्वनवदिग्लाभारिगो भार्गवात् । जायायार्थनवात्मजेषु हिमगोर्मंदात्त्रिषड्धीव्यये दिग्धीषट्स्वसुखायपूर्वनवगो ज्ञात्स स्मरेषूदयात् ॥" वराहः । "पूजाभिलाषं प्रांते निस्पृहेऽपि कुर्याद्गुरौ शुद्धिविवर्जितेऽपि।वरस्य लाभे शुभदं विवाहं वदंति गर्गच्यवनादिमुख्याः॥" अत्र चतुर्थाष्टमद्वादशस्थानस्थितत्वेन गुरोर्द्विगुणत्रिगुणादिकां पूजां विधाय विवाहव्रतबंधादि शुभमिति संप्रदायविदः ॥४६॥

अथ गुरुदौष्ट्यापवादमनुष्टुभाह—

स्वोच्चे स्वभे स्वमैत्रे वा स्वांशे वर्गोत्तमे गुरुः ॥
रिःफाष्टतुर्यगोऽपीष्टो नीचारिस्थः शुभोऽप्यसन् ४७

स्वोच्च इति॥ गुरुश्चतुर्थादिनिंद्यस्थानस्थितोऽपि स्वोच्चे कर्के स्वभे धनुर्मीने स्वमैत्रे मेषसिंहवृश्चिके स्वांशे धनुर्मीननवांशे वर्गोत्तमे नवांशे। यथा वृषराशौ वृषनवांशे गुरुर्वर्गोत्तमलक्षणम्। वर्गोत्तमाः नवांशाश्चरादिषु प्रथममध्यांता इति। एषु स्थितो गुरुरिष्टः शुभफलदाता। अन्येषु एतादृशो गुरुरतीव शुभः भुजबलः। "वर्गोत्तमे स्वभवने भवनेऽथ मैत्रे मित्रांशके स्वभवनोच्चनवांशके वा। जन्माष्टरिःफरिपुखत्रिचतुर्थगोऽपि जीवः सुखार्थसुतवृद्धिकरो विवाहे॥"नीचेति। नीचं मकरः अरिस्थः मिथुनकन्यातुलवृषराशिस्थः शुभोऽप्यसन् अनिष्टफलदातेत्यर्थः। उक्तं च। "उच्चस्थः स्वगृहे सुहृद्भवनगो वाचस्पतिर्नित्यशः पूर्णायुर्विविधार्थसौख्यजनको जन्माष्टमस्थोऽपि चेत्। नीचस्थोऽरिगृहे दिवाकरकरच्छायानुगामी सदापीष्टोऽनिष्टफलं ददाति नियतं वैधव्यदुःखास्पदम्॥" अत्राष्टमस्थोऽपि चेदित्यपिशब्देन चाष्टमं लक्षगुणं प्रपूजयेदिति विधानात् पूजामनीहमानेऽप्युपनयनादि शुभं स्यात्। द्वादशचतुर्थस्थानस्थस्य तु द्विगुणपूजामिच्छतः। तथा तृतीयादिस्थानस्थस्य पूजामात्रापेक्षस्य गुरोः शुभफलदातृतास्तीति किं वक्तव्यमिति कैमुतिकन्यायसूचनार्थोऽपिशब्दः। "न चाष्टमं लक्षगुणं प्रपूजयेत्।" इति शत्रुगृहस्थितगुर्वभिप्रायम्। अस्यापवादो रत्नकोशे। "गोचराष्टकवर्गाभ्यां यस्य शुद्धिर्न लभ्यते। तस्योपनयनं कार्यं चैत्रे मीनगते रवौ॥ हरौ सिंहांशगे जीवे नीचर्क्षे नीचभागगे। मौंजीबंधः शुभः प्रोक्तश्चैत्रे मीनगते रवौ॥" पाठांतरम्। "जन्मभादष्टगे सिंहे नीचे वा शत्रुगे गुरौ।" इति। अर्थाच्चैत्रे मेषगोऽर्को निषिद्धः। तथा चोक्तम्। "सौम्यायने व्रतं कार्यं चैत्रे मासि विशेषतः॥ झषो न निंद्यो यदि फाल्गुने स्यादजस्तु वैशाखगतो न निंद्यः।

मध्वाश्रितौ द्वावपि वर्जनीयावित्यादिवाचामियमेव युक्तिः ॥" इति । इदं गणेशदैवज्ञैरभ्यधायि तन्निर्मूलमिव प्रतिभाति मूलवाक्याभावात् ॥ ४७ ॥

अथ व्रतबंधे वर्ज्याननुष्टुभाह—

कृष्णे प्रदोषेऽनध्याये शनौ निश्यपराह्णके ॥
प्राक्संध्यागर्जिते नेष्टो व्रतबंधो गलग्रहे ॥ ४८ ॥

कृष्णेति ॥ एषु व्रतबंधो नेष्टः कृष्णे प्रथमत्रिभागरहितकृष्णपक्षे प्रदोषे यस्मिन्दिने संध्याकाले प्रदोषो भवेत्तद्दिवसे । प्रदोषलक्षणमर्कतर्केत्याद्यग्रे वक्ष्यति अनध्याये वक्ष्यमाणे । निशीति । "अंगवंगकलिंगेषु सौराष्ट्रमगधेषु च । तीर्थयात्रां विना गच्छन्पुनः संस्कारमर्हति ॥ " इति । पुनः संस्कारप्राप्तौ निमित्तानंतरमेव नैमित्तिकमिति न्यायेन यदि रात्रिसद्भावस्तदोपनयनं नाभूदिति रात्रिपदोक्तिः । तथा प्राक्संध्या प्रातःसंध्या तस्यां गर्जिते मेघशब्दे । वसिष्ठः । "व्रते हि पूर्वसंध्यायां वारिदो यदि गर्जति । तद्दिनं स्यादनध्यायो व्रतं तत्र विवर्जयेत् ॥ " इति । अपरार्कः । " क्षीणे चंद्रेऽष्टमे शुक्रे निरंशे चैव भास्करे । कर्तव्यं नोपनयनं नानध्याये गलग्रहे ॥ राशेः प्रथमभागस्थो निरंशः सूर्य उच्यते । " तथा गलग्रहे । गलग्रहानाह गुरुः । " त्रयोदश्यादि चत्वारि सप्तम्यादि दिनत्रयम् । चतुर्थी चैकतः प्रोक्ता अष्टावेते गलग्रहाः ॥ " दैवज्ञमनोहरे । " प्रदोषे निश्यनध्याये मंदे कृष्णे गलग्रहे । मधुं विनोपनीतस्तु पुनः संस्कारमर्हति ॥ " इति । " गलग्रहे प्रदोषे च स्वल्पायुरुपजायते । " इति च ॥ ४८ ॥

अथांशफलमनुष्टुभाह—

क्रूरो जडो भवेत्पापः पटुः षट्कर्मकृद्बटुः ॥
यज्ञार्थभाक्तथा मूर्खो रव्याद्यंशे तनौ क्रमात् ॥ ४९ ॥

क्रूरो जड इति ॥ षट् कर्माणि " यजनं याजनं चैव तथा दान-

प्रतिग्रहौ । अध्यापनं चाध्ययनं षट्कर्मा धर्मभाग्द्विजः ॥ " इति । अन्यत्स्पष्टम् ॥ ४९ ॥

अथ चंद्रनवांशफलं स्वनवांशे सापवादं " तौ जौ लगुरू वद मोटनकम् " इति लक्षणलक्षितेन मोटनकच्छंदसाह—

विद्यानिरतः शुभराशिलवे पापांशगते हि दरिद्र-तरः ॥ चंद्रे स्वलवे बहुदुःखयुतः कर्णादितिभे धनवान्स्वलवे ॥ ५० ॥

विद्यानिरत इति ॥ यस्मिन्कस्मिन्राशौ चंद्रो यदि शुभग्रहराशिनवांशे स्यात्तदा व्रती विद्यानिरतो भवेत् । यदि पापग्रहराशिनवांशे चंद्रस्तदा दरिद्रतरः धनरहितः । यदि स्वलवे कर्कांशे स्यात्तदा बहुदुःखसंहितो भवेत् । अथ स्वांशगतचंद्रस्यापवादमाह । कर्णेति । कर्णे श्रवणे अदितौ पुनर्वसौ नक्षत्रे उपनयने स्वांशे चंद्रः स्यात्तदा धनवान्भवेत् । नारदः । " श्रवणादितिनक्षत्रे कर्कांशस्थे निशाकरे । तदा व्रती वेदशास्त्रधनधान्यसमृद्धिमान् ॥ " इति ॥

केंद्रस्थानां फलमनुष्टुभाह—

राजसेवी वैश्यवृत्तिः शास्त्रवृत्तिश्च पाठकः ॥ प्राज्ञोऽर्थवान्म्लेच्छसेवी केंद्रे सूर्यादिखेचरैः ॥ ५१ ॥

राजसेवीति ॥ केंद्रे सूर्यादिखेचरैः प्रत्येकं सहिते क्रमादिदं फलं ज्ञेयम् । अन्यत्स्पष्टम् । अत्र लग्नस्थं चंद्रं केंद्रस्थं शनिं च विना सर्वे ग्रहाः शुभा इत्यवगम्यते । मुनिभिस्तु केंद्रपापा निषिद्धा इत्युक्तम् । यदाह नारदः । " स्फूर्जितं केंद्रगे भानौ व्रतिनो वंशनाशनम् । कूजितं केंद्रगे भौमे शिष्याचार्यविनाशनम् ॥ करोति रुदितं केंद्रसंस्थे मंदे महागदम् । लग्नकेंद्रगते राहौ रंध्रं मातृविनाशनम् ॥ उग्रकेंद्रगते केतौ व्रतिवित्तविनाशनम् । " इति । अत्र स्वगृहोच्चाद्यवस्थिताः पापाः केंद्रस्थाः शुभफलदातारः । अन्यथा नेति विरुद्धार्थवचनयोर्विषयविवेकः ॥ ५१ ॥

अथान्यदाह—

शुक्रे जीवे तथा चंद्रे सूर्यभौमार्किसंयुते ॥
निर्गुणः क्रूरचेष्टः स्यान्निर्घृणः सद्युते पटुः ॥ ५२ ॥

शुक्रेति ॥ शुक्रे जीवे चंद्रे प्रत्येकं सूर्यसंयुते व्रती निर्गुणः स्यात् भौमसंयुते क्रूरचेष्टः । क्रूरा हिंसनशीला चेष्टा यस्य तादृशः स्यात् । तथा शनिसंयुते निर्घृणो निर्लज्जो निर्दयो वा स्यात् । तथा तस्मिन्नेव जीवे शुक्रे चंद्रे वा प्रत्येकं सद्भिर्युते बटुः सर्वविद्यानिपुणः स्यात् ॥ ५२ ॥

अथान्यत्प्रमाणिकयाह—

विधौ सितांशगे सिते त्रिकोणगे तनौ गुरौ ॥
समस्तवेदविद्व्रती यमांशगेऽतिनिर्घृणः ॥ ५३ ॥

विधौ सितांशगे इति ॥ चंद्रे शुक्रांशगे शुक्रे त्रिकोणगे गुरौ तनौ लग्ने च सति व्रती बटुः समस्तांश्चतुरो वेदान्वेत्तीति समस्तवेदवित्स्यात् । एवं यमांशगे शनिनवांशसंस्थिते चंद्रे सति लग्ने गुरौ च सति सिते त्रिकोणगे सति अतिनिर्घृणः कृतघ्नः स्यात् । महेश्वरः । " जीवे लग्नमधिष्ठिते भृगुसुते धर्मात्मजस्थे विधौ शुक्रांशागखिलवेदविद्रविसुतस्यांशे कृतघ्नोऽधमः । " इति । नारदः । " लग्नं सर्वगुणोपेतं लभ्यतेऽन्यदिने न सत् । दोषाल्पत्वं गुणाधिक्यं बहुसंमतमिष्यते ॥ दोषदुष्टो हि कालो यः स ग्रहीतुं न शक्यते । " दोषा वेधादयो महादोषा इत्यर्थः ॥ ५३ ॥

अथानध्यायाञ्जघनचपलार्ययाह—

शुचिशुक्रपौषतपसां दिगश्विरुद्रार्कसंख्यसिततिथयः ॥ भूतादित्रितयाष्टमिसंक्रमणं च व्रतेष्वनध्यायः ॥ ५४ ॥

शुचिशुक्रेति ॥ अनध्यायाः आषाढशुक्लदशमी ज्येष्ठशुक्लद्वितीया

पौषशुक्लैकादशी माघशुद्धद्वादशी एते अनध्यायाः । भूतश्चतुर्दशी तदादित्रितयं चतुर्दशीपूर्णिमाप्रतिपदः । कृष्णपक्षे अमावास्या तन्मध्ये अष्टमी च तयोः समाहारः । तथा संक्रमणं सूर्यस्य निरयनं संक्रांतिदिनम् । चकारान्मन्वाद्यास्त्रितिथी मधावित्यादिनोक्ताः तत्राषाढशुक्लदशमी पौषशुद्धैकादशी च मन्वादी ज्येष्ठशुक्लद्वितीया माघशुद्धद्वादशी च सोपपदे । यद्यपि चैत्रशुद्धतृतीया मन्वादिर्वैशाखशुद्धतृतीया युगादिस्तथापि ते उभे तृतीये नानध्यायौ । तथैव फाल्गुनकृष्णा द्वितीया चातुर्मास्यद्वितीयापि नानध्यायः । तासां प्राशस्त्याभिधानात् । तथा च वसिष्ठः । " या चैत्रवैशाखसिता तृतीया माघस्य सप्तम्यथ फाल्गुनस्य । कृष्णे द्वितीयोपनये प्रशस्ता प्रोक्ता भरद्वाजवसिष्ठमुख्यैः ॥ " इति । अन्यासां युगादिमन्वादीनां व्रतबंधे अप्रसंगादेवाग्रहणम् । केचिदाचार्याः या चैत्रवैशाखेति वचनं लिखित्वाऽपि स्वेच्छया नांगीकुर्वंति । तत्र शपथमात्रमेव । प्रमाणं न पश्याम इत्यलम् । तन्मते तृतीये अनध्यायत्वे न ज्ञेये । व्रतेष्विति पदमावश्यकत्वद्योतनार्थम् । गौतमः । "पक्षद्वये चतुर्दश्यामष्टमीद्वितये तथा । पक्षादावपि पक्षांते ब्रह्म नाधीयते नरैः ॥ " फलं च । " अष्टमी हंत्युपाध्यायं शिष्यं हंति चतुर्दशी । अमावास्योभयं हंति प्रतिपत्पाठनाशिनी ॥ " मनुः । " चातुर्मास्यद्वितीयासु मन्वादिषु युगादिषु । अष्टकासु च संक्रांतौ शयने बोधने हरेः ॥ अनध्यायं प्रकुर्वीत तथा सोपपदासु च । " इति । चातुर्मास्यद्वितीया गर्गेणोक्ताः । " आषाढफाल्गुनोर्जेषु या द्वितीया विधुक्षये । चातुर्मास्यद्वितीयास्ताः प्रवदंति महर्षयः ॥ " मन्वादयो युगादयश्च पूर्वमुक्ताः । " सिता ज्येष्ठे द्वितीया च आश्विने दशमी सिता । चतुर्थी द्वादशी माघ एताः सोपपदाः स्मृताः ॥ " नैमित्तिका अनध्यायास्तु स्मृत्यर्थसारे । निर्घातभूकंपोल्कानिपतनादिसर्वाद्भुतेष्वकालिकानध्यायाः । अग्न्युत्पाते

वाऽकालवृष्टौ वा । आर्द्रादिज्येष्ठांतात्कालादन्यत्राकालवृष्टिः । सायंसंध्यागर्जने उदयांतोऽनध्यायः । अर्धरात्रादूर्ध्वं गर्जनेऽर्धरात्रे वा आकालिकोऽनध्यायः । प्रातःसंध्यागर्जने त्वहोरात्रमिति । कालं मर्यादीकृत्येत्याकालम् । आकाले भव आकालिकः । यस्मिन्काले निमित्तमुत्पन्नं तदारभ्य द्वितीयदिने तत्कालपर्यंतमित्यर्थः । स्मृतिरत्नावल्याम् । " अनुराधर्क्षमारभ्य षोडशर्क्षेषु भास्करः । यावच्चरति वै तावदकालं मुनयो विदुः ॥ " इति । " कालवृष्टौ तु तत्कालमकाले तु त्रिरात्रकम् । अतिमात्राथ वा वृष्टिर्नाधीयीत दिनत्रयम् ॥ " आपस्तंबः । " उल्कायामग्न्युत्पाते च सर्वासां विधानामाकालिकम् । ' इति । मनुः । " चौरैरुपप्लुते ग्रामे संभ्रमे चाग्निकारिते । आकालिकमनध्यायं विद्यात्सर्वाद्भुतेषु च ॥ " इति । अद्भुतेषु रुधिरादिवृष्टिषु । वसिष्ठः । " उपलरुधिरप्रपाते त्र्यहम् " इति । स्मृत्यंतरे । " विद्युद्गर्जितवृष्टीनां सन्निपातो यदा भवेत् । कालवृष्टौ तु तत्कालमकाले तु त्रिरात्रकम् ॥ " इत्यादि । नैमित्तिका अनध्याया यदा मेखलाबंधात्प्रागुत्पन्नास्तदा व्रतबंधो न कार्य एव । यदा तु मेखलाबंधानंतरं ब्रह्मौदनपाकात्प्रागुत्पन्नास्तदा जातो न निवर्तते ॥ ५४ ॥

अथ प्रदोषलक्षणमनुष्टुभाह—

अर्कतर्कत्रितिथिषु प्रदोषः स्यात्तदग्रिमैः ॥
रात्र्यर्धसार्धप्रहरयाममध्यस्थितैः क्रमात् ॥ ५५ ॥

अर्केति ॥ तदग्रिमैस्तिथिभिरर्कादितिथिषु प्रदोषः स्यात् । यथा द्वादश्यामर्धरात्रात्प्राक् त्रयोदशीप्रवृत्तौ प्रदोषः । षष्ठ्यां सार्धप्रहरमध्ये सप्तमीप्रवृत्तिस्तदा प्रदोषः । तथा तृतीयायां प्रहरमध्ये चतुर्थीप्रवेशे प्रदोषः । अत्र द्वितीयप्रहरस्य चरमघटिका तृतीयप्रहरस्याद्यघटिकेत्येवं घटिकाद्वयमितः कालो रात्र्यर्द्धशब्दवाच्यः । तेन समांशवाचित्वाभावादर्धं नपुंसकमिति एकदेशिसमासाभावः ॥ ५५ ॥

अथ व्रतबंधानंतरं सायंकाले बह्वृचां ब्रह्मौदनाख्यः संस्कारोऽभिहितः तत्रार्यया विशेषमाह--

प्राग्ब्रह्मौदनपाकाद्व्रतबंधानंतरं यदि चेत् ॥
उत्पातानध्ययनोत्पत्तावपि शांतिपूर्वकं तत्स्यात् ॥९६॥

प्राग्ब्रह्मौदनेति ॥ स्पष्टार्थम् । उक्तं च नृसिंहप्रसादे । "ब्रह्मौदनविधेः पूर्वं प्रदोषे गर्जितं भवेत् । तदा विघ्नकरं ज्ञेयं बटोरध्ययनस्य तत् ॥ तस्य शांतिप्रकारं तु वक्ष्ये शास्त्रानुसारतः । स्वस्तिवाचनपूर्वं तु हवनं कारयेद्बुधः ॥ प्रधानं पायसं साज्यं द्रव्यं शांतियजौ भवेत् । सूक्तं बृहस्पते विद्वान्पठेद्विद्यासमृद्धये ॥ गायत्रीयुंजतो मंत्रः प्रायश्चित्तं तु सर्पिषा । धेनुं सवत्सकां दद्यादाचार्याय पयस्विनीम् ॥ शिलां होमविधेः पश्चात्स्थापयेत्तत्र संसदि । ब्राह्मणान् भोजयेत्पश्चात्ततो ब्रह्मौदनं चरेत् ॥" इति ॥ ९६ ॥

अथ वेदविशेषेण नक्षत्राणि वसंततिलकयाह---

वेदक्रमाच्छशिशिवाहिकरत्रिमूलपूर्वासु पौष्णकरमैत्रमृगादितीज्ये ॥ ध्रौवेषु चाश्विवसुपुष्यकरोत्तरेशकर्णे मृगांत्यलघुमैत्रधनादितौ सत् ॥ ९७ ॥

वेदेति ॥ मृगाश्लेषार्द्राहस्तचित्रास्वातीमूलपूर्वात्रयेषु ऋग्वेदाध्यायिनाम् । रेवतीहस्तानुराधामृगपुनर्वसुपुष्यरोहिण्युत्तरात्रयेषु यजुर्वेदाध्यायिनाम् । अश्विनीधनिष्ठापुष्यहस्तोत्तरात्रयार्द्राश्रवणेषु सामवेदाध्यायिनाम् । मृगरेवतीपुष्याश्विनीहस्तानुराधाधनिष्ठापुनर्वसुषु अथर्ववेदाध्यायिनां पूर्वश्लोकानुवृत्ततत्पदपरामृष्टमुपनयनं सत् शुभमित्यर्थः । उक्तं च । "मूले हस्तत्रये सार्पशैवे पूर्वात्रये तथा । ऋग्वेदाध्यायिनां कार्यं मेखलाबंधनं बुधैः ॥ पुष्ये पुनर्वसौ पौष्णे हस्ते मैत्रे शशांकभे । ध्रौवेषु च प्रशस्तं स्याद्यजुषां मौंजिबंधनम् ॥ पुष्यवासवहस्ताश्विशिवकर्णोत्तरात्रयम् । प्रशस्तं मेखलाबंधे बटूनां

सामगायिनाम् ॥ मृगमैत्राश्विनीहस्तरेवत्यदितिवासवम् । अथर्वपाठिनां शस्तो भगणोऽयं व्रतार्पणे ॥ " ॥ ५७ ॥

अथान्यं विशेषमनुष्टुभाह—

नांदीश्राद्धोत्तरं मातुः पुष्पे लग्नांतरे न हि ॥
शांत्या चौलं व्रतं पाणिग्रहः कार्योऽन्यथा न सत् ५८

नांदीश्राद्धेति ॥ नांदीश्राद्धं वृद्धिश्राद्धं तत्कृत्यानंतरं यदि संस्कार्यमातुः पुष्पे रजोदर्शने जाते सति लग्नांतरसत्वे सति चौलादि न सत् । दुष्टफलदमित्यर्थः । मेधातिथिः । " चौले च व्रतबंधे च विवाहे यज्ञकर्मणि । पत्नी रजस्वला यस्य प्रायस्तस्य न शोभनम् ॥" स्मृत्यंतरे । "प्राप्तमभ्युदयं श्राद्धं पुत्रसंस्कारकर्मणि । पत्नी रजस्वला जाता न कुर्यात्तत्पिता तदा ॥ " इति । तत्पितेति नांदीश्राद्धकर्तुरुपलक्षणम् । अतो ज्येष्ठभ्रात्रादिना करिष्यमाणनांदीश्राद्धात्प्राक्तत्पत्नी रजस्वला चेत्तदा नांदीश्राद्धनिषेधान्मंगलं न कार्यमेव । संस्कार्यमातरि रजस्वलायां तु सन्निहितलग्नांतरासंभवे शांतिं कृत्वा तदानीमेव तन्मंगलं कार्यम् । आरब्धत्वान्न स्मृत्युक्तदोषः । अपशकुननिरासार्थं शांतिः कार्या । उक्तं च । "वधूवरान्यतरस्य जननी चेद्रजस्वला । संपूर्णे तु बले प्राप्ते कुर्यात्तत्पाणिपीडनम् ॥ " इति । बले ग्रहबले च । वाक्यसारे । " अलाभे सुमुहूर्तस्य रजोदोषे ह्युपस्थिते । श्रियं संपूज्य विधिवत्ततो मंगलमाचरेत् ॥ हैमीं माषमितां पद्मां श्रीसूक्तविधिनार्चयेत् । प्रत्यृचं पायसं हुत्वाभिषिच्य हितमाचरेत् ॥ " यदा तु कृतेऽपि मंगले मंडपोद्वासनात्प्राङ् मातरि रजस्वलायां शांत्यादिकं कार्यमेव । मंगलस्यासमाप्तत्वात् । यदा तु ज्येष्ठभ्रात्रादिना कृतान्नांदीश्राद्धात्परं तत्पत्नी रजस्वला चेत्तदा न कोऽपि दोषः । अन्योऽपि विशेषस्तत्रैव । " उपवासेन शुद्ध्यंति नार्यः सद्यो रजस्वलाः । एकाकिन्यो विवाहादौ देशभंगेषु चापदि ॥ " इति ॥ ५८ ॥

अथ छूरिकाबंधनमुहूर्त्तमनुष्टुभाह––

विचैत्रव्रतमासादौ विभौमास्ते विभूमिजे ॥
छूरिकाबंधनं शस्तं नृपाणां प्राग्विवाहतः ॥ ५९ ॥

विचैत्रेति ॥ चैत्रवर्जितेषूपनयनमासेषु माघफाल्गुनवैशाखज्येष्ठेष्वित्यर्थः । आदिशब्देन व्रतबंधोक्ततिथिनक्षत्रजन्मलग्नादीनां ग्रहणम् । कीदृशे व्रतमासादौ विभौमास्ते भौमास्तरहिते । गुरुशुक्रास्तादिवर्जनं सामान्यनिषेधादेव सिद्धम् । ततो विभूमिजे भौमवाररहिते सूर्यादिवारे नृपाणां विवाहतः पूर्वं छूरिकाया अल्पशस्त्रविशेषस्य बंधनं कट्यामिति शेषः । तच्छस्तं हितम् । विवाहात्प्रागित्युक्तेरवधिनिश्चयात्समावर्तनानंतरं कार्यम् । अन्यथोपनयनानंतरं कार्यमित्येव ब्रूयात् ॥ ५९ ॥

अथ केशांतसमावर्तनमुहूर्त्तावनुष्टुभाह––

केशांतं षोडशे वर्षे चौलोक्तदिवसे शुभम् ॥
व्रतोक्तदिवसादौ हि समावर्तनमिष्यते ॥ ६० ॥

इति मुहूर्तचिंतामणौ पंचमं संस्कारप्रकरणं समाप्तम् ॥ ५ ॥

केशांतमिति ॥ षोडशे वर्षे चौलोक्तदिवसे चूडावर्षेत्यादिना कथितशुभमुहूर्ते गोदानापरपर्यायं केशांतसंज्ञं कर्म शुभं स्यात् । गावः केशा दीयंते खंडयंते यस्मिंस्तद्गोदानम् । "गोदानं षोडशे वर्षे" इत्येतद्ब्राह्मणविषयम् । क्षत्रियविशोर्द्वाविंशे चतुर्विंशे च विधानात् । तथा च मनुः । "केशांतं षोडशे वर्षे ब्राह्मणस्य विधीयते । राजन्यबंधोर्द्वाविंशे वैश्यस्य द्व्यधिके ततः ॥" इति । आश्वलायनः । "प्रथमं स्यान्महानाम्नी द्वितीयं च महाव्रतम् । तृतीयं स्यादुपनिषद्गोदानाख्यं ततः परम् ॥" अत्र "जाताधिकाराद्गोदानं जन्माद्यब्दे तु षोडशे ।" इति वृत्तिकारवचनात् त्रयोदशादिषु महानाम्न्यादीनि भवंति । त्रयोदशे महानाम्नी चतुर्दशे महाव्रतं पंचदशे उपनिषद्व्रतं षोडशे गोदानमिति । एवं क्षत्रियविशोर-

पि उक्तगोदानकालात्प्राग्वर्षचतुष्टयक्रमेण महानाम्न्यादीनि भवंति ।
व्रतोक्तेति । हि निश्चयेन यज्ञोपवीतोक्तदिवसे आदिशब्देन वारन-
क्षत्रतिथिलग्नांशकेषु समावर्तनकर्मेष्यते । अत्र कश्यपेन चैत्रो
वर्जितः । " चैत्रमासविवर्जेषु मघादिषु च पंचसु । " एतच्च गोदा-
नानंतरं विवाहात्प्राक्कार्यम् । "कुर्यात्समावर्त्तनकर्म पश्चाद्गोदानतः
पाणिनिपीडनात्प्राक् । " इति वसिष्ठोक्तेः । क्वचिद् द्वितीयवर्षे
तन्निषेध उक्तः । "वधूप्रवेशं व्रतमोक्षणं च पुंसां पुनर्दारपरिग्रहं
च । नाब्दे द्वितीये विदधीत धीमान्वदंति गर्गात्रिवसिष्ठमुख्याः ॥ "
इति तन्निर्मूलत्वादुपेक्ष्यम् । परिकरोऽलंकार उत्सर्गापवादरूपः ।
शेषं स्पष्टम् ॥ ६० ॥

इति श्रीदैवज्ञानंतसुतदैवज्ञरामविरचिते मुहूर्तचिंतामणौ स्व-
कृतायां टीकायां प्रमिताक्षरायां पंचमं संस्कारप्रकरणं
समाप्तम् ॥ ५ ॥

अथ विवाहप्रकरणं प्रारभ्यते ॥ ६ ॥

अथ विवाहप्रकरणं व्याख्यायते । तत्रानाश्रमी न तिष्ठेतेत्या-
दिवचनात्समावर्तनानंतरं सर्वाश्रमाणामुपकारकत्वाद्गृहस्थाश्रम एव
मुख्यः स च सुशीलस्त्र्यधीनः । शीलं सुलग्नाधीनमित्यतो लग्नशु-
द्धिकथनं वसंततिलकया प्रतिजानीते—

भार्यात्रिवर्गकरणं शुभशीलयुक्ता शीलं शुभं भ-
वति लग्नवशेन तस्याः॥ तस्माद्विवाहसमयः परि-
चिंत्यते हि तन्निघ्नतामुपगताः सुतशीलधर्माः ॥ १ ॥

भार्येति ॥ शुभं भर्त्रादेरनुकूलं शीलं स्वभावो यस्याः सा त्रिव-
र्गस्य धर्मार्थकामरूपस्य करणमतिशयेन साधनम् । तस्याः सुलग्न-
वशेन शीलं शुभं भवति । यतः सुतशीलधर्माः । तन्निघ्नता विवा-
हाधीनताम् । " अधीनो निघ्न आयत्तः " इत्यमरोक्तेः । उपगताः
प्राप्ताः । अतो हीति निश्चयेन विवाहसमयः परिचिंत्यते विचार्यते

इति । ननु जन्मकालीनग्रहजनितं शुभाशुभं दुरतिक्रममिति विवाहलग्नानर्थक्यमिति चेन्न । ज्योतिषस्मृत्या वेदितशुभसमयारब्धविधिजन्या पूर्वजनितशुभफलेन जन्मांतरीयदुर्दिष्टध्वंसो भवतीत्येवमर्थतया सार्थक्यात् । अत एव सत्याचार्यः । " शुभक्षणक्रियारंभजनिताः पूर्वसंभवाः । संपदः सर्वलोकानां ज्योतिस्तत्र प्रयोजनम् ॥ " इति सर्वत्र ज्ञेयम् ॥ १ ॥

अथ प्रश्नलग्नाद्विवाहयोगद्वयं स्रग्धरयाह—

आदौ संपूज्य रत्नादिभिरथ गणकं वेदयेत्स्वस्थचित्तं कन्योद्वाहं दिगीशानलहयविशिखे प्रश्नलग्नाद्यदींदुः ॥ दृष्टो जीवेन सद्यः परिणयनकरो गोतुलाकर्कटाख्यं वा स्यात्प्रश्नस्य लग्नं शुभखचरयुतालोकितं तद्विदध्यात् ॥ २ ॥

आदौ संपूज्येति ॥ अथशब्दो मंगलार्थः । आदौ गणकं ज्योतिर्विदं रत्नादिभिः मणिवस्त्रफलादिभिः संपूज्य ततः प्रष्टा कन्याया उद्वाहं गणकं वेदयेत् । " गतिबुद्धि " इत्यादिना कर्तुः कर्मत्वम् । कीदृशं गणकम् । स्वस्थचित्तमव्याकुलांतःकरणम् । " स्वस्थे चित्ते बुद्धयः संभवंति " इत्युक्तेः । उत्पलः । " प्रष्टा मणिकनकयुतैः फलकुसुमै राशिचक्रमभ्यर्च्य । पृच्छेद्यथाभिलषितं भक्त्या विनयान्वितः प्रश्नम् ॥ " दिगिति । यदि प्रश्नलग्नाद्दशमैकादशतृतीयसप्तमपंचमानामन्यतमे स्थाने स्थितश्चंद्रो जीवेन गुरुणा दृष्टः सद्यः शीघ्रं परिणयनकरः स्यात् । वा अथवा गोतुलेति । वृषतुलाकर्कानामन्यतमं प्रश्नलग्नं स्यात्तच्च शुभग्रहैर्युतमवलोकितं वा भवेच्चेत्तत्परिणयनं विदध्यात् ॥ २ ॥

अथान्यं योगद्वयं द्रुतविलंबितेनाह—

विषमभांशगतौ शशिभार्गवौ तनुगृहं बलिनौ यदि

पश्यतः ॥ रचयतो वरलाभमिमौ यदा युगलभां-
शगतौ युवतिप्रदौ ॥ ३ ॥

विषमभांशगताविति ॥ स्पष्टार्थम् ॥ ३ ॥

अथ प्रश्नलग्नाद्वैधव्ययोगत्रयं शालिन्याह--

षष्ठाष्टस्थः प्रश्नलग्नाद्यदींदुर्लग्ने क्रूरः सप्तमे वा
कुजः स्यात् ॥ मूर्ताविंदुः सप्तमे तस्य भौमो रंडा
सा स्यादष्टसंवत्सरेण ॥ ४ ॥

षष्ठाष्टस्थ इति ॥ चंद्रः प्रश्नलग्नात्षष्ठाष्टमस्थस्तदा कन्याष्टमंव-
त्सरेण विवाहवर्षाद्रंडा भर्तृनाशिका स्यात् । अथवा लग्ने यः
कश्चित्क्रूरग्रहः स्यात्ततः सप्तमे कुजो भवेत्तदाष्टवर्षमध्ये रंडा स्यात् ।
केचित्सप्तमेऽपि पापमेवं प्रश्ने निषेधंति । कश्यपः । "एको लग्नगतः
पापो ह्यन्यः सप्तमराशिगः । आसप्तमाब्दान्मरणं पुरुषस्य न सं-
शयः॥" इति । तेषां मते सप्तमे वा खलः स्यादिति पाठः। अथवा
मूर्तौ लग्ने चंद्रस्तस्य सप्तमे भौमो भवेत्तदाऽष्टवर्षेण रंडा स्यात् ॥४॥

अथ प्रश्नलग्नात्कुलटामृतवत्सायोगं दोधकवृत्तेनाह—

प्रश्नतनोर्यदि पापनभोगः पंचमगो रिपुदृष्टशरीरः ॥
नीचगतश्च तदा खलु कन्या सा कुलटा त्वथवा
मृतवत्सा ॥ ५ ॥

प्रश्नतनोरिति ॥ स्पष्टार्थः । कश्यपः । " स्वनीचगः शत्रुदृष्टः
पापः पंचमगो यदा । मृतपुत्रां करोत्येव कुलटां वा न संशयः ॥"
इति ॥ ५ ॥

अथ विवाहभंगयोगं पुष्पिताग्रयाह--

यदि भवति सितातिरिक्तपक्षे तनुगृहतः समरा-
शिगः शशांकः ॥ अशुभखचरवीक्षितोऽरिरंध्रे
भवति विवाहविनाशकारकोऽयम् ॥ ६ ॥

यदीति ॥ सितातिरिक्तपक्षे कृष्णपक्षे यदि चंद्रः समराशिषु वृषकर्कादिषु गतः सन् तनुगृहतः प्रश्नलग्नादरिरंध्रे षष्ठेऽष्टमे वा स्थाने स्थितः पापग्रहावलोकितो भवति तदायं योगो विवाहस्य विनाशकारको भवति ॥ ६ ॥

एवं प्रश्नलग्नाद्वैधव्यादियोगमभिधायेदानीं लग्नादावपि बालवैधव्ययोगविचारमतिदिशंस्तत्परिहारं शार्दूलविक्रीडितेनाह——

जन्मोत्थं च विलोक्य बालविधवायोगं विधाय व्रतं
सावित्र्या उत पैप्पलं हि सुतया दद्यादिमां वा रहः ॥
सल्लग्नेऽच्युतमूर्तिपिप्पलघटैः कृत्वा विवाहं स्फुटं
दद्यात्तां चिरजीविनेऽत्र न भवेद्दोषः पुनर्भूभवः ॥७॥

जन्मोत्थमिति ॥ प्रश्नलग्नाद्यथा विधवायोगो विचारितस्तथा जन्मोत्थं जन्मलग्नोद्भवं च बालविधवायोगं जातकशास्त्रात् । "बाल्ये विधवा भौमे पतिसंत्यक्ता दिवाकरेऽस्तस्थे । सौरे पापैर्दृष्टे कन्यैव जरां समुपयाति ॥" तथा । "लग्ने व्यये च पाताले जामित्रे चाष्टमे कुजे । कन्या भर्तृविनाशाय भर्ता कन्याविनाशदः ॥" इत्याद्युक्तैर्बालविधवायोगं विचार्य वक्ष्यमाणं व्रतं वैधव्यपरिहारकरं कारयेदित्यन्वयः । तत्र वैधव्ययोगपरिहारः। "यो यो भावः स्वामिदृष्टो युतो वा सौम्यैर्वा स्यात्तस्य तस्यास्ति वृद्धिः ।" इति । सप्तमस्थानं स्वस्वामिसौम्येक्षितं चेद्भवति तदा भर्तुः सुखं भवतीति । अन्ये स्त्रीणां महत्यरिष्टयोगे भर्तुश्च स्वल्पेऽरिष्टयोगे तत्परिहारमाहुः । अथापरिहार्ये वैधव्ययोगे प्रतीकारमाह । विधायेति । रह इति वक्ष्यमाणमिहापि योज्यम् । पित्रादिः सुतया कन्यया कृत्वा रह एकांते हि निश्चयेन सावित्र्या व्रतं विधाय पश्चादिमां कन्यां चिरंजीविने वराय दद्यात् । तदुक्तं व्रतखंडे । "सावित्र्यादिव्रतादीनि भक्त्या कुर्वंति याः स्त्रियः । सौभाग्यं च सुहृत्त्वं च भवेत्तासां सुसंततिः ॥" इति । व्रतग्रहणप्रकारस्तत

एवावगंतव्यः । पिप्पलव्रतं ज्ञानभास्करे । " बलवद्विधवायोगे बाल्ये सति मृगीदृशाम् । पिता रहसि कुर्वीत तद्भंगं शास्त्रसंमतम् ॥ सुदिने शुभनक्षत्रे चंद्रताराबलान्विते । अवैधव्यकरैर्योगैर्लग्ने ग्रहबलान्विते ॥ व्रतारंभं प्रकुर्वीत बालवैधव्यनाशकम् ॥ सुस्नातां चित्रवसनां कन्यां पितृगृहाद्बहिः ॥ नीत्वाश्वत्थशमीस्थाने यद्वा बदरिकाश्रमे । आलवालं प्रकुर्वीत विपुलं मृदु कर्षितम् ॥ कुमार्याचार्यनिर्दिष्टं कृत्वा संकल्पमादरात् । करकांबुप्रपूर्णेन सिंचनं प्रतिवासरम् ॥ चैत्रे वाश्विनमासे वा तृतीया सितपक्षतः । यावत्कृष्णतृतीयान्या मासमेकं यथाविधि ॥ ब्राह्मणानां तथा स्त्रीणां पूजनं च समाचरेत् । तदाशिषाप्नुयात्कन्या सौभाग्यं च सुखान्वितम् ॥ प्रतिमां पार्वतीनाम्नीं वैणवे भाजनेऽर्चयेत् । चंदनाक्षतदूर्वाद्यैर्बिल्वपत्रैर्यथाविधि ॥ उपचारैर्यथाशक्त्या नैवेद्यैः प्रतिवासरम् । एवं व्रतप्रभावेण बालवैधव्यनिष्कृतिः ॥ जायते कन्यकानां च ततः पाणिग्रहक्रिया । " इत्यश्वत्थव्रतम् । अन्यमपि वैधव्ययोगपरिहारमाह । वा रह इत्यादिना । अथवा रह एकांते । अच्युतमूर्तिर्विष्णुप्रतिमा पिप्पलवटौ प्रसिद्धौ एषां मध्येऽन्यतमेन सह सल्लग्ने वक्ष्यमाणदोषरहिते सौभाग्यगुणान्विते च विवाहलग्ने विवाहं कृत्वा पश्चात्तां कन्यां स्फुटं लोकप्रसिद्धं यथा भवति तथा चिरजीविने वराय दद्यात्पित्रादिकः । तदुक्तं मार्कंडेयेन । " बालवैधव्ययोगेऽपि कुंभद्रुप्रतिमादिभिः । कृत्वा लग्नं रहः पश्चात्कन्योद्वाह्येति चापरे ॥ " इति । कुंभ इति मंथन्या अप्युपलक्षणम् । द्रुर्वृक्षोऽश्वत्थ एव । प्रतिमा विष्णोः सौवर्णी करशिरोवयवादिसहिता न शालग्रामादिरूपा । तत्र कुंभविवाहः सूर्यारुणसंवादे । " विवाहात्पूर्वकाले तु चन्द्रताराबले शुभे । विवाहोक्तेन मन्थन्या कुंभेन च सहोद्वहेत् ॥ पिता संकल्प्य वाद्यं च विवाहविधिपूर्वकम् । सूत्रेण वेष्टयेत्पश्चाद्दशतंतुविधानतः ॥ कुंकुमालंकृतं देहं तयोरेकांतमंदिरे । ततः कुंभं विनिःसार्य प्रभज्य सलिलाशये ॥ ततोऽभिषेचनं कुर्यात्पंचपल्लववारिभिः । तत्सर्वं वस्त्रपूजाद्यं ब्राह्मणाय निवेद्य च ॥ क-

न्यालंकारवस्त्राद्यं ब्राह्मणाय निवेदयेत् । प्रार्थना । वरुणांगस्वरूप त्वं जीवनानां समाश्रय ॥ पतिं जीवय कन्यायाश्चिरं पुत्रान्सुखं वरम् । देहि विष्णुवरानंदं कन्यां पालय दुःखतः ॥ " इति । इति कुंभविवाहः । अश्वत्थविवाहोऽपि तत्रैव । " सुहृद्विजगुरून्नारी मंगलोच्चारणैः समम् । आहूयोद्वाहकाले च रम्यभूमौ च मंडपे ॥ गत्वा प्रणम्य गौरीं च गणनाथं च भूरुहम् । भवानीं चैव मन्थानीं पिता मन्त्रमुदीरयेत् ॥ उद्वाहयिष्ये विधिवदश्वत्थेन मनोहराम् । कन्यां सौभाग्यसौख्यार्थं हेतवेऽहं द्विजोत्तमाः ॥ नमस्ते विष्णुरूपाय जगदानंदहेतवे । पितृदेवमनुष्याणामाश्रयाय नमो नमः ॥ वनानां पतये तुभ्यं विष्णुरूपाय भूरुह । नमो निखिलपापौघनाशनाय नमो नमः ॥ पूर्वजन्मकृतं पापं बालवैधव्यकारकम्[1] । नाशयाशु सुखं देहि कन्याया मम भूरुह ॥ " इत्यश्वत्थविवाहे संकल्पप्रार्थने । विवाहस्तु कुंभविवाहवद्विधेयः । एवमेव सौवर्ण्या विष्णुप्रतिमया सह विवाहं विधाय प्रतिमां ब्राह्मणाय दद्यात् । दानप्रकारस्तत्रैव । " शुभे मासे सिते पक्षे सानुकूलग्रहे दिने । ब्राह्मणं साधुमामंत्र्य सम्पूज्य विविधार्हणैः ॥ तस्मै दद्याद्विधानेन विष्णोर्मूर्तिं चतुर्भुजाम् । शुद्धवर्णसुवर्णेन वित्तशक्त्याथ वा पुनः ॥ निर्मितां रुचिरां शंखगदाचक्राब्जसंयुताम् । दधानां वाससी पीते कुमुदोत्पलमालिनीम् ॥ सदक्षिणां च तां दद्यान्मंत्रमेतमुदीरयेत् । यन्मया पूर्वजनुषि घ्नंत्या पतिसमागमम् ॥ विषोपविषशस्त्राद्यैर्हतो वाऽतिविरक्तया । प्राप्यमाणं महाघोरं यशःसौख्यधनापहम् ॥ वैधव्याद्यतिदुःखौघनाशाय सुखलब्धये । महासौभाग्यलब्ध्यै च महाविष्णोरिमां तनुम् ॥ सौवर्णीं निर्मितां शक्त्या तुभ्यं संप्रददे द्विज । अनघा त्वहमस्मीति त्रिवारं प्रवदेदिति ॥ एवमस्त्विति विप्राशीर्गृहीत्वा स्वगृहं विशेत् । ततो वैवाहिकं तातो विधिं कुर्यान्मृगीदृशः ॥ " इति प्रतिमादानविधिः । एवं घटादिभिः सह विवाहमेकांते विधाय पश्चाद्बाद्यादित्रघो-

१ भवम् इति पाठः । २ बहु ।

पपुरःसरं पित्रादिः कन्यामायुष्मते वराय दद्यात् । अत्र पुनर्विवाहात्पुनर्भूत्वदोषो न भवति । यतो विधानखंडे । " स्वर्णांबुपिप्पलानां च प्रतिमा विष्णुरूपिणी । तया सह विवाहे च पुनर्भूत्वं न जायते ॥ " इत्युक्तत्वात् । चकाराद्घटस्यापि । " लक्ष्मीरूपा सदा कन्या हरिरूपं सदा जलम् । हरेर्दत्तं च यद्दानं दातुः पापहरं सदा ॥ लक्ष्मीनारायणप्रीत्यै या दत्ता कन्यका बुधैः । तारयेत्सकलं दातुः कुलं पूर्वापरं सदा ॥ चन्द्रवह्निचंबुगंधर्वशिवसोमस्मरा इमे । पतयः कन्यकानां च बाल्यात्संति सदैवते ॥ तदुद्वाहविधिर्यत्नात्कृतो नो जनयेदघम् । यथालिभुक्तकमलं देवानां पूजनाय वै ॥ अर्हं भवति सर्वत्र तथा कन्या नृणां भवेत् । " श्रुतावपि सोमादिभिः सह विवाहोऽभिहितः । " सौमः प्रथमो विविदे गन्धर्वो विविद उत्तरः । तृतीयो अग्निष्टे पतिस्तुरीयस्ते मनुष्यजः ॥ " इति । अतो दैवतभोग्यानां कन्यानां पुरुषविवाहे यथा न दोषः पुनर्भूभवस्तथात्रापि । अत एव "मन्थन्या भास्करो यत्नात्कृतवान्दुहितुर्विधिम् । रेणुकोऽपि स्वकन्यायास्तरूद्वाहं चकार सः ॥" इति विधानखंडेऽभिधानात् । अत एव " पित्रा मात्रा तथा भ्रात्रा दत्ता या तोयधारया । विप्राग्निसुहृदां साक्ष्यं कृत्वा सोद्वाहिता भवेत् ॥ " इति कात्यायनादिपरिभाषितत्वादेकदा कन्या पुरुषविवाहं निर्वर्त्य पुनर्द्वितीयपुरुषविवाहे जाते सा पुनर्भूरेवेत्यलम् ॥ ७ ॥

अथान्यत्स्रग्विण्याह—

प्रश्नलग्नक्षणे यादृशापत्ययुक् स्वेच्छया कामिनी तत्र चेदाव्रजेत् ॥ कन्यका वा सुतो वा तदा पंडितैस्तादृशापत्यमस्या विनिर्दिश्यते ॥ ८ ॥

प्रश्नलग्नक्षण इति ॥ तत्र ज्योतिर्वित्समीपे यादृशापत्ययुक् । यादृशापत्यत्वमेव विवृणोति । कन्यकेत्यादि । शेषं स्पष्टम् ॥ ८ ॥

अथ सामान्यतो निमित्तवशेन शुभप्रश्नं स्रग्विण्याह—

शंखभेरीविपंचीरवैर्मंगलं जायते वैपरीत्यं तदा

लक्षयेत् ॥ वायसो वा खरः श्वा सृगालोऽपि वा प्रश्नलग्नक्षणे रौति नादं यदि ॥ ९ ॥

शंखभेरीति ॥ विपंची वीणा एतेषां रवैः प्रश्नलग्ने श्रुतैर्मंगलं जायते । उपलक्षणत्वान्मनोह्लादितुरगगजच्छत्रादिसान्निध्येऽपि शुभम् । अथाशुभयोगाः । वैपरीत्यमिति । वायसः काकः खरो गर्दभः श्वा कुक्कुरः सृगालः प्रसिद्धः । यदि प्रश्नलग्नक्षणे वायसादि नादं शब्दं करोति तदा वैपरीत्यमशुभं लक्षयेत् । उपलक्षणादुलूकोष्ट्रमहिषनादोऽप्यशुभः । अन्ये शुभयोगाः शौनकादिभ्यो ज्ञेयाः । विवाहवृंदावने उपश्रुतिरप्युक्ता । " आरोप्याक्षतपूरिते गणपतिं प्रस्थादिपात्रे शनैः संमार्जन्यधिवेष्टिते युवतयस्तिस्रः सकन्या निशि । निर्याता रजकादिवेश्मसु करे कृत्वा तमभ्यर्चितं यां वाचं शृणुयुस्तदर्थसदृशी लोके किलोपश्रुतिः ॥ " तन्मंत्रश्च । " उपश्रुति महादेवि चांडालगृहवासिनि । यथार्थं ब्रूहि देवि त्वं शक्रराज्यप्रवर्धिनि ॥ " ॥ ९ ॥

अथ कन्यावरणमुहूर्तं मत्तमयूरच्छंदसाह--

विश्वस्वातीवैष्णवपूर्वात्रयमैत्रैर्वस्वाग्नेयैर्वा करपीडोचितऋक्षैः ॥ वस्त्रालंकारादिसमेतैः फलपुष्पैः संतोष्यादौ स्यादनु कन्यावरणं हि ॥ १० ॥

विश्वस्वातीति ॥ उत्तराषाढादिनक्षत्रैरुपलक्षिते काले वस्त्रालंकारादिशब्देन खाद्यादिमधुरवस्तुभिः सहितैः फलपुष्पैरादौ कन्यां संतोष्य तोषयित्वाऽनु पश्चात्कन्यावरणं हि निश्चयेन स्यात् । कन्यावरयोर्लक्षणानि सामुद्रिकाध्यायादवगंतव्यानि ॥ १० ॥

अथ वरणमुहूर्त्तमाह--

धरणिदेवोऽथ वा कन्यकासोदरः शुभदिने गीतवाद्यादिभिः संयुतः ॥ वरवृतिं वस्त्रयज्ञोपवीतादिना ध्रुवयुतैर्वह्निपूर्वात्रयैराचरेत् ॥ ११ ॥

धरणीति ॥ धरणिदेवो ब्राह्मणः पुरोहितादिः । चंडेश्वरः । "पूर्वात्रितयमाग्नेयमुत्तरात्रितयं तथा । रोहिणी तत्र वरणे भगणः शस्यते सदा ॥ उपवीतं फलं पुष्पं वासांसि विविधानि च । देयं वराय वरणे कन्याभ्रात्रा द्विजेन वा ॥ " इति ॥ ११ ॥

अथ कन्याविवाहकालं ग्रहशुद्धिं च वसंतमालिकाच्छंदसाह—

गुरुशुद्धिवशेन कन्यकानां समवर्षेषु षडब्दकोपरिष्टात् ॥ रविशुद्धिवशाच्छुभो नराणामुभयश्चंद्रविशुद्धितो विवाहः ॥ १२ ॥

गुरुशुद्धिवशेनेति ॥ कन्यानां विवाहः षडब्दकोपरिष्टात् षड्वर्षातिक्रमानंतरं समवर्षेषु सत्सु वटुकन्याजन्मराशेरित्याद्युक्तगुरुशुद्धौ सत्यां विवाहः शुभः । अर्थात्पुरुषाणां विषमवर्षेषु गोचरप्रकरणोक्तरविशुद्धौ सत्यां विवाहः शुभः । राजमार्तंडः । " तृतीयः षष्ठगश्चैव दशमैकादशस्थितः । रविः शुद्धो निगदितो वरस्यैव करग्रहे ॥ जन्मस्थे च द्वितीयस्थे पंचमे सप्तमेऽपि वा । नवमे भास्करे पूजां कुर्यात्पाणिग्रहोत्सवे ॥ चतुर्थे वाष्टमे चैव द्वादशे भास्करे स्थिते । वरः पंचत्वमाप्नोति कृते पाणिग्रहोत्सवे ॥ " इति । यत उक्तम् । " षडब्दमध्ये नोद्वाह्या कन्या वर्षद्वयं ततः । सोमो भुंक्तेऽथ गंधर्वस्ततः पश्चाद्धुताशनः ॥ " इति । व्यासः । " अष्टवर्षा भवेद्गौरी नववर्षा च रोहिणी । दशवर्षा भवेत्कन्या अत ऊर्ध्वं रजस्वला ॥" वात्स्यः । " द्वादशे वृषली स्मृता " इति । " गौरीं ददद्ब्रह्मलोकं सावित्रं रोहिणीं ददत् । कन्यां ददत्स्वर्गलोकमतः परमसद्गतिम् ॥ " प्राप्नोतीति शेषः । अत्र " युग्मेऽब्दे जन्मतः स्त्रीणां शुभदं पाणिपीडनम् । " इत्युक्तत्वात्पुनर्नववर्षाया रोहिण्या अयुग्मवर्षत्वाद्विवाहनिषेधः प्राप्नोतीत्यत्र व्यवस्थामाह श्रीपतिः । " मासत्रयादूर्ध्वमयुग्मवर्षे युग्मे तु मासत्रयमेव यावत् । विवाहशुद्धिं प्रवदंति संतो वात्स्यादयो गर्गवराहमुख्याः ॥ " इत्यतो नववर्ष-

स्यायुग्मत्वनिषेधोऽष्टवर्षानंतरं मासत्रयपर्यंतमेव । तदनंतरं तु सुखेन विवाह इत्यविरोधः । एवं च षष्ठवर्षानंतरं जन्मतो विषमवर्षीयमासत्रयानंतरं नव मासाः शुभाः । समवर्षे आद्यमासत्रयं चेति गर्भतो युग्मवर्षे इति निष्कृष्टोऽर्थः । उभयोरिति । स्त्रीपुंसयोश्चंद्रविशुद्धितो विवाहः शुभः । उभयोश्चंद्रबलमावश्यकमित्यर्थः । शुद्धिर्गोचरेणाभिहिता । गोचरबलाभावे अष्टकवर्गादिबलं ग्राह्यमित्याह नारदः । "गोचरं वेधजं चाष्टवर्गजं रूपजं बलम् । यथोत्तरं बलाधिक्यं स्थूलं गोचरमार्गजम् ॥" इति । व्यासः । "कन्याया ग्रहशुद्धिश्च दशवर्षावधिः स्मृता । दशवर्षव्यतिक्रांता कन्या शुद्धिविवर्जिता ॥ तस्यास्तारेंदुलग्नानां शुद्धौ पाणिग्रहो मतः ।" इति ॥ १२ ॥

अथ विहितान्मासान्द्रुतविलंबितेनाह—

मिथुनकुंभमृगालिवृषाजगे मिथुनगेऽपि रवौ त्रिलवे शुचेः ॥ अलिमृगाजगते करपीडनं भवति कार्तिकपौषमधुष्वपि ॥ १३ ॥

मिथुनेति ॥ अलिर्वृश्चिकः एतद्राशिगते रवौ सति तत्रापि मिथुनस्थिते रवौ सति शुचेराषाढस्य त्रिलवे तृतीयांशे । आषाढशुद्धप्रतिपदमारभ्य दशमीपर्यंतं करपीडनं विवाहो भवति । अर्थादितरराशिगे सूर्ये आषाढशुद्धदशम्यनंतरं मिथुनराशिगेऽर्केऽपि हरिशयने च विवाहो न स्यात् । अलीति । एतद्राशिगे सूर्ये कार्तिकपौषमधुष्वपि करपीडनं स्यात् । वृश्चिके कार्तिके मकरे पौषे मेषे चैत्रेऽपीत्यर्थः । इदं तु सौरमासग्रहिलानां मतम् । श्रीधरोऽपि । "पौषेऽपि कुर्यान्मकरस्थितेऽर्के चैत्रे भवेन्मेषगते यदा स्यात् । प्रशस्तमाषाढकृतं विवाहं वदंति गर्गा मिथुनस्थितेऽर्के ॥" इति । ये तु चांद्रमासानेवाहुर्नारदादयः । "माघफाल्गुनवैशाखज्येष्ठमासाः शुभप्रदाः । मध्यमः कार्तिको मार्गशीर्षो वै निंदिताः परे ॥" इति । तेषां मते फाल्गुनो विहित इति तत्र मीनसंक्रमणसद्भावेऽपि शुभः । चैत्रो निषिद्ध इति मेषसंक्रमणसद्भावेऽप्यशुभः । तदुक्तं

वृंदावने। "झषो न निंद्यो यदि फाल्गुने स्यादजस्तु वैशाखगतो न निंद्यः। मध्वाश्रितौ द्वावपि वर्जनीयौ।" इति। "अजस्तु वैशाखगतो न निंद्यः" इति तु निर्मूलमेव। वस्तुतस्तु वसिष्ठेन उभयमासविधानात्सौरचांद्रमासैक्ये उत्तमो विवाहः। एकतरपक्षाश्रयेण मध्यमः। "दिनाधिपे मेषवृषालिकुंभनृयुग्मनक्राख्यघटर्क्षसंस्थे। माघद्वये माधवशुक्रयोश्च मुख्योऽथ वा कार्त्तिकसौम्ययोश्च॥" इति। अथ प्रसंगात्सौरचांद्रमासविधायकवचनानि तेषां व्यवस्था च लिख्यते। तत्र ऋष्यशृंगः। "विवाहव्रतयज्ञेषु सौरमानं विधीयते।" गार्ग्योऽपि। "विवाहोत्सवयज्ञेषु सौरमानं प्रशस्यते।" वृद्धगर्गः। "विवाहादौ स्मृतः सौरो यज्ञादौ सावनः स्मृतः।" इत्येवमादीनि सौरमासविधायकवचनानि। अथ चांद्रमासविधायकानि। तथा च वसिष्ठः। "उद्वाहयज्ञोपनयप्रतिष्ठातिथिव्रतक्षौरमहोत्सवाद्यम्। पर्वक्रिया वास्तुगृहप्रवेशाः सर्वं हि चांद्रेण विगृह्यते तत्॥" नारदः। "यात्रोद्वाहव्रतक्षौरतिथिवर्षेशनिर्णयम्। पर्ववास्तूपवासादि कृत्स्नं चांद्रेण गृह्यते॥" इत्यादीनि। तत्रैकतरमासावलंबनेऽपरवैयर्थ्यं स्यादित्यत्र समाधीयते। यत्र सौरचांद्रमानाभ्यां मासशुद्धिरुपलभ्यते स उत्तमो विवाहः। एकतरपक्षावलंबने मध्यम इत्युक्तं प्राक्। मध्यमपक्षावलंबनं च अवश्यदेयकन्याविषयं वेदितव्यम्। अपरे पुनर्देशविवाहयोः। तथा। "तापिनीकृष्णयोर्मध्ये चांद्रो मासः प्रशस्यते। अन्येषु सर्वदेशेषु सौरो व्रतविवाहयोः॥" तथा। "विंध्याद्रेर्दक्षिणे भागे चांद्रो मासः प्रशस्यते। उदग्भागे तु विंध्यस्य सौरं मानं विधीयते॥ अन्येषु सर्वदेशेषु मिश्रमानं प्रकल्पयेत्।" इति॥ १३॥

अथ मासप्रसंगाज्जन्ममासादिप्रयुक्तनिषेधविधीन्रथोद्धतयाह—

आद्यगर्भसुतकन्ययोर्द्वयोर्जन्ममासभतिथौ करग्रहः॥
नोचितोऽथ विबुधैः प्रशस्यते चेद्द्वितीयजनुषोः सुतप्रदः॥

आद्येति॥ यस्मिंश्चांद्रे मासे जन्म स जन्ममासः। जन्मतिथि-

मारभ्य त्रिंशत्तिथ्यात्मको मासो जन्ममासो वेत्युच्यते । पक्षद्वयम-ध्ये प्रथमप्रकारेण प्रतिपादितम् । जन्मनक्षत्रं जन्मतिथिः । समा-हारद्वंद्वः । जन्ममुहूर्त्तोऽपि । तत्राद्यगर्भयोः सुतकन्ययोर्द्वयोः कर-ग्रहो विवाहो नोचितो निषिद्धः । वसिष्ठः । " स्वजन्ममासर्क्षतिथि-क्षणेषु वैनाशिकाद्दक्षगणेषु चैवम् । नोद्वाहमात्माभ्युदयाभिकांक्षी नैवाद्यगर्भद्वितयं कदाचित् ॥ " एतदपवादोऽपि । " जातं दिनं दूषयते वसिष्ठः " इत्यादि पूर्वमुक्तम् । अथेति । द्वितीयजनुषोरना-द्यगर्भयोश्चेद्विवाहस्तर्हि सुतप्रदो विबुधैः पंडितैः प्रशस्यते । अत्रा-द्यगर्भराहित्यं सर्वथा विवक्षितम् । अथवा चेदनाद्यजनुषोरिति पठितव्यम् । तथा च च्यवनः । " जन्मर्क्षे जन्ममासे वा ताराया-मथ जन्मनि । जन्मलग्ने भवेद्वोढा पुत्राढ्या पतिवल्लभा ॥ " इति । एतच्चानाद्यगर्भविषयम् । आद्यगर्भे साक्षान्निषेधात् ॥ १४ ॥

ज्येष्ठमासे विशेषं शालिन्याह—

ज्येष्ठद्वंद्वं मध्यमं संप्रदिष्टं त्रिज्येष्ठं चेन्नैव युक्तं क-दापि ॥ केचित्सूर्ये वह्निगं प्रोज्झ्य चाहुर्नैवान्योन्यं ज्येष्ठयोः स्याद्विवाहः ॥ १५ ॥

ज्येष्ठद्वंद्वमिति ॥ पुत्रो ज्येष्ठः कन्या च ज्येष्ठा मासोऽपि ज्येष्ठ इत्येतत्त्रिज्येष्ठं यत् तत् कदापि नैव युक्तं न प्रशस्तम् । ज्येष्ठमासे ज्येष्ठयोर्वधूवरयोर्विवाहो नैव कार्य इत्यर्थः । यदा त्वेकतरज्येष्ठत्वे ज्येष्ठमासो भवति तदा मध्यमं संप्रदिष्टम् । अगतिविषयकमित्यर्थः । एकं ज्येष्ठमन्यद्वयमज्येष्ठं तदा शुभमेव । वराहः । " द्वौ ज्येष्ठौ मध्यमौ प्रोक्तावेकज्येष्ठः शुभावहः । ज्येष्ठत्रयं न कुर्वीत विवाहे सर्वसंमतम् ॥ " अस्यापवादमाह । केचिदिति । सत्यावश्यकत्वे सूर्ये वह्निगं कृत्तिकास्थं त्यक्त्वा ज्येष्ठमासेऽपि ज्येष्ठवरस्य कन्याया विवाहः शुभ इति केचिदूचुः । एतच्च ज्येष्ठापत्यस्य न ज्येष्ठे इति सामान्यतो मंगलकृत्यनिषेधेऽपि द्रष्टव्यम् । भरद्वाजः । "ज्येष्ठे ज्ये-

ष्ठस्य कुर्वीत भास्करे चानलस्थिते । सोत्सवादीनि कार्याणि दिनानि दश वर्जयेत् ॥" इति । अत्र ज्येष्ठपुत्रदुहित्रोर्ज्येष्ठमासवन्मार्गशीर्षेऽपि मंगलकृत्यनिषेधमाह । भरद्वाजः । " मार्गशीर्षे तथा ज्येष्ठे क्षौरं परिणयव्रतम् । आद्यपुत्रदुहित्रोस्तु यत्नेन परिवर्जयेत् ॥ " इति । स्वयमपि "ज्येष्ठापत्यस्य न ज्येष्ठे कैश्चिन्मार्गेऽपि नेष्यते । " इत्युक्तं प्राक् । केचिद्ग्रहणं शिष्टाचाराभावादिति सूचयितुम् । नैवान्योऽन्यमिति । ज्येष्ठायाः कन्याया ज्येष्ठपुत्रेण सह विवाहो नैव स्यात् । गर्गः । " ज्येष्ठायाः कन्यकायाश्च ज्येष्ठपुत्रस्य वै मिथः । विवाहो नैव कर्तव्यो यदि स्यान्निधनं तयोः ॥ " इति ॥ १७ ॥

अथान्यं विशेषं हरिणीछंदसाह—

सुतपरिणयात्षण्मासांतः सुताकरपीडनं
न च निजकुले तद्वद्वा मंडनादपि मुंडनम् ॥
न च सहजयोर्देये भ्रात्रोः सहोदरकन्यके
न सहजसुतोद्वाहोऽब्दार्धे शुभे न पितृक्रिया ॥ १८ ॥

सुतपरिणयादिति ॥ निजकुले इति देहलीदीपन्यायेनात्रापि संबध्यते । निजकुले स्ववंशे सुतस्य पुत्रस्य परिणयात्षण्मासांतः षण्मासमध्ये सुताकरपीडनं कन्याविवाहो न स्यात् । नारदः । " पुत्रोद्वाहात्परं पुत्रीविवाहो न ऋतुत्रये । न तयोर्व्रतमुद्वाहान्मंडनादपि मुंडनम् ॥ " इति । तद्वदिति । निजकुले त्रिपुरुषमध्ये पुत्रस्य कन्याया वा मंडनाद्विवाहान्मुंडनं चौलोपनयनसमावर्तनादि वा तद्वत् षण्मासमध्ये न कार्यम् । अत्रिः । " कुले ऋतुत्रयादर्वाग्मंडनान्न तु मुंडनम् । प्रवेशान्निर्गमं चैव न कुर्यान्मंडनत्रयम् ॥ " इति । अत्र विशेषः शार्ङ्गीये । " व्रतं समावर्तनकं सचौलं केशांतमेतानि वदंति तज्ज्ञाः । क्षौरं पुरस्कृत्य भवंति यस्माच्चत्वारि तस्मादिह मुंडनानि ॥ चूडासीमंतकेशांतविवाहोपनयान्बुधाः ।

---

१ कुर्यान्न इति पाठः ।

गुरु मंगलमित्याहुस्तदन्यल्लघु मंगलम् ॥ ज्येष्ठं कृत्वा तु षण्मासं न कुर्याल्लघु मंगलम् । कुर्वंति मुनयः केचिदन्यस्मिन्नपि वत्सरे ॥ लघु वा मंगलं कार्यं कार्यं नैमित्तिकं हि तु । पुत्रोद्वाहः प्रवेशाख्यः कन्योद्वाहस्तु निर्गमः ॥ मुंडनं चौलमित्युक्तं व्रतोद्वाहौ तु मंगलम् । चौलं मुंडनमेवोक्तं वर्जयेद्वरणात्परम् ॥ मौंजी तूभयतः कार्या यतो मौंजी न मुंडनम् । अभिन्ने वत्सरेऽपि स्यात्तदहस्तत्र भेदयेत् ॥ अभेदे दिवसस्यापि न कुर्यादेकमंडपे ॥ " इति । एषां समूलत्वे देशकालसंकटे सति बोद्धव्यम् । उक्तं च । " एकोदरयोर्द्वयोरेकदिनोद्वाहने भवेन्नाशः । नद्यंतर एवैकं दिनेऽप्याहुः संकटे च शुभम् ॥ न प्रतिषिद्धं लग्नं संप्राप्ते संकटे महति । एकोदरसंभवयोरेकाहे भिन्नमंडपे काले ॥ " इति । न चेति । सहजयोः सोदर्योभ्रात्रोः सहोदरकन्यके न देये नोद्वाह्ये । नारदः । " न चैकजन्मनोः पुंसोरेकजन्ये तु कन्यके । नूनं कदाचिदुद्वाह्ये नैकदा मुंडनद्वयम् ॥ " इति । अत्र चकारोऽनुक्तसमुच्चयार्थस्तेनैकस्मै वराय सहोदरकन्याद्वयमपि न देयम् । " न पुत्रीद्वयमेकस्मै प्रदद्यात्तु कदाचन । " इति वसिष्ठोक्तेः । न सहजसुतोद्वाहोऽब्दार्धं इति । सुतश्च सुतश्च सुतौ सुता च सुता च सुते " सरूपाणामेकशेष " इत्येकशेषः । सुता च सुतश्च सुतौ च " पुंमान् स्त्रिया " इत्येकशेषः । सुतौ च सुता च सुते च सुतो वेति सुताः इति कृतैकशेषेण द्वंद्वे " पुमान् स्त्रिया " इत्येकशेषः । सहजाश्च ते सुताश्चेति कर्मधारयः । तेषां सोदरभ्रातॄणां विवाहः अब्दार्धे षण्मासमध्ये न कार्यः । उद्वाह इत्युपलक्षणम् । ततश्चैकमातृजयोः पुत्रयोः कन्ययोर्वा कन्यापुत्रयोर्वा समानसंस्कारो न कार्य इत्यर्थः । वृद्धमनुः । " एकमातृजयोरेकवत्सरे पुरुषस्त्रियोः । न समानां क्रियां कुर्यान्मातृभेदे विधीयते ॥ " समानक्रिया मुंडनादिका । भिन्नमातृजयोः समानक्रियायां न दोषः । नारदः । " समानापि क्रिया कार्या मातृभेदे तथैव च । विवाहो दुहितुः कार्यो न विवाहश्चतुर्दिनम् ॥ " इति ।

भिन्नमातुर्दुहितुर्विवाहः समानक्रियायां यदि दिनचतुष्टयमध्ये न कार्य इत्यर्थः । वसिष्ठेन विशेष उक्तः । “ एकोदरप्रसूतानां नात्र कार्यत्रयं भवेत् । भिन्नोदरप्रसूतानां नेति शातातपोऽब्रवीत् ॥ ” इति । चौलोपनयनविवाहरूपं कार्यत्रयम् । “ आदौ चौलं ततो मौंजी विवाहश्च शुभप्रदः । मातृभेदे बुधैरुक्तो मातुरैक्ये न कर्हिचित् ॥ एवं सति भिन्नोदरमंगलमावश्यकत्वे गृहभेदादेकगृहे आचार्यभेदाद्वा कार्यम् । वसिष्ठः । “ द्विशोभनं त्वेकगृहे न चेष्टं शुभं तु पश्चान्नवभिर्दिनैस्तु । आवश्यकं शोभनमुत्सवो वा द्वारेऽथ वाचार्यविभेदतो वा ॥ ” इति । यमलजातयोस्त्वयमपि निषेधो नास्ति । “ एकस्मिन्वत्सरे चैव वासरे मंडपे तथा । कर्तव्यं मंगलं स्वस्रोर्भ्रात्रोर्यमलजातयोः ॥ ” तत्रापि ज्येष्ठानुक्रमेण कार्यम् । ज्येष्ठानुक्रमस्तु गर्भोत्पत्तिक्रमेण । तथा च भागवते तृतीयस्कंधे हिरण्याक्षहिरण्यकशिपूत्पत्तौ “ प्रजापतिर्नाम तयोरकार्षीद्यः प्राक् स्वदेहाद्यमयोरजायत । तं वै हिरण्यकशिपुं विदुः प्रजा यं तं हिरण्याक्षमसूत साग्रतः॥ ” इति । तथा वैद्यके आत्रेयसंहितायाम् । “यदा विशेद्द्विधाभूतं बीजं पुष्पे परिक्षरत् । तदा भवेद्द्विधा गर्भः सूतिर्वेशविपर्ययात् ॥ ” तेन प्रथमं जातः कनिष्ठः अनंतरं जातो ज्येष्ठः । अत एव “ यमयोश्चैव गर्भे तु जन्मतो ज्येष्ठता मता । ” इति मनुना गर्भे जन्मत इत्युक्तम् । “ जन्मज्येष्ठेन चाह्वानं सुब्रह्मण्यास्वपि स्मृतम् । ” इति तु मनुवचनमेककोशजातयमलविषयम् । तथा च देवलः । “ यस्य जातस्य यमयोः पश्यंति प्रथमं मुखम् । संतानः पितरश्चैव तस्मिञ्ज्यैष्ठ्यं प्रतिष्ठितम् ॥ ” इति । संतानो वंशः । यदा तु पुंसो बलातिशयाद्रेतसो द्विधा पातस्तदा कोशद्वये यमलोत्पत्तिः । यदा तु गर्भवायुना एकस्मिन्नेव कोशे रेतसो द्वैधीभावस्तदा एककोशे एव युगपद्यमलं जन्यते । ननु स्त्रीणां विवाह उपनयनस्थान इति स्मृतेः कन्याविवाहस्य पुत्रोपनयनस्य च समानत्वमिति चेन्न । “ अष्टवर्षं ब्राह्मणमुपनयेत् ” इति वचने ब्राह्मणग्रहणात्स्त्रीशूद्राणां व्रतबंधनिषेधाच्च । यत्तु स्त्रीणां विवाह उपनयनस्थान इत्युक्तं तत्तासां द्वि-

जत्वसिद्ध्यर्थमतः स्त्रीविवाहो विवाह एव न तूपनयनम्। तस्मात्सोदरकन्यापुत्रयोर्विवाहोपनयनयोः समानसंस्कारत्वाभावात् षण्मासमध्येऽपि ते कार्ये। शुभे इति। शुभे विवाहादिमंगलकृत्ये पितृक्रिया श्राद्धक्रिया न कार्या। "मङ्गले नाप्यमंगलम्" इति नारदोक्तेः। अमंगलं श्राद्धम्। समाप्ते एव मंगले कार्यं न मध्ये इत्यर्थः॥१६॥

अथ प्रतिकूलनिर्णयमिंद्रवज्रयाह—

वध्वा वरस्यापि कुले त्रिपूरुषे नाशं व्रजेत्कश्चन निश्चयोत्तरम्॥ मासोत्तरं तत्र विवाह इष्यते शांत्याथ वा सूतकनिर्गमे परैः॥ १७॥

वध्वा वरस्येति॥ निश्चयोत्तरं वाग्दानानंतरं यदि वध्वाः कन्यायाः वरस्य वा कुले वंशे त्रिपुरुषे पुरुषत्रयमध्ये कश्चन सपिंडो नाशं प्राप्नुयात्। तत्र मासोत्तरं मरणदिनादारभ्य त्रिंशद्दिनं प्रतिकूलम्। ततः शांत्या स्वनुष्ठितया विवाहः सुखेन इष्यते। इदं पित्रादिभिन्नविषयम्। मांडव्यः। "अन्येषां तु सपिंडानामाशौचं माससंमितम्। तदंते शांतिकं कृत्वा ततो लग्नं विधीयते॥" पित्रादिमरणे तु विशेषः। "वरवध्वोः पिता माता पितृव्यश्च सहोदरः। एतेषां प्रतिकूलं चेन्महाविघ्नकरं भवेत्॥ पिता मातामहश्चैव माता वापि पितामही। पितृव्यः स्त्री सुतो भ्राता भगिनी वा विवाहिता॥ एभिरेव विपन्नैश्च प्रतिकूलं बुधैः स्मृतम्। वाग्दानानंतरं यत्र कुलयोः कस्यचिन्मृतिः॥ तदा संवत्सरादूर्ध्वं विवाहः शुभदो भवेत्। पितुराशौचमब्दं स्यात्तदर्धं मातुरेव हि॥ मासत्रयं तु भार्यायास्तदर्धं भ्रातृपुत्रयोः।" अन्यच्च। "प्रतिकूले सपिंडस्य मासमेकं विवर्जयेत्। विवाहस्तु ततः पश्चात्तयोरेव विधीयते॥ दुर्भिक्षे राष्ट्रभंगे च पित्रोर्वा प्राणसंशये। प्रौढायामपि कन्यायां प्रतिकूलं न दुष्यति॥ दीर्घरोगाभिभूतस्य दूरदेशस्थितस्य च। उदासवर्तिनश्चैव प्रतिकूलं न विद्यते॥ संकटे समनुप्राप्ते

याज्ञवल्क्येन योगिना । शांतिरुक्ता गणेशस्य कृत्वा तां शुभमाचरेत् ॥" अथावश्यकत्वेऽपवादमाह । अथवेति । आशौचनिर्गमे शांत्या स्वनुष्ठितया विवाहः परैराचार्यैरिष्यते । ज्योतिःप्रकाशे । "प्रतिकूलेऽपि कर्त्तव्यो विवाहो मासमंतरा । शांतिं विधाय गां दत्त्वा वाग्दानादि चरेद्बुधः ॥" ॥ १७ ॥

अथान्यदपि विशेषांतरमुपजात्याह—

चूडाव्रतं चापि विवाहतो व्रताच्चूडा न चेष्टा पुरुषत्रयांतरे ॥ वधूप्रवेशाच्च सुताविनिर्गमः षण्मासतो वाब्दविभेदतः शुभः ॥ १८ ॥

चूडाव्रतमिति ॥ अपिशब्दात्समावर्तनादि चौलमुपनयनं समावर्त्तनं च विवाहानंतरं पुरुषत्रयमध्य एव नेष्टम् । तथा व्रतादुपनयनाच्चूडा च पुरुषत्रयपर्यंतं नेष्टा । तथा वध्वाः स्नुषायाः प्रवेशात्सुताया विनिर्गमोऽपि पुरुषत्रयपर्यंतमेव नेष्टः । मेधातिथिः । "पुरुषत्रयपर्यंतं प्रतिकूले स्वगोत्रिणाम् । प्रवेशान्निर्गमस्तद्वत्तथा मुंडनमंडने ॥" इति । तस्मान्मूलपुरुषस्य चतुर्थत्वे नायं दोषः । स चायं दोषः पुरुषत्रयेऽपि षण्मासपर्यंतमेव । अत एव षण्मासत इति मासषट्कानंतरं परतोऽपि विवाहादिः शुभः । एतन्मूलवाक्यं कुले ऋतुत्रयादर्वागित्यादिना प्रागुक्तम् । अत्रापवाद उच्यते । वेति । अथवा अब्दभेदात् वर्षभेदात् षण्मासमध्येऽपि शुभः । यथा माघे विवाहो वैशाखे चौलं यज्ञोपवीतं वा भवतीत्यर्थः । संहितासारावल्याम् । "फाल्गुने चैत्रमासे तु पुत्रोद्वाहोपनायने । भेदादब्दस्य कुर्वीत नर्तुत्रयविलंघनम् ॥" इति ॥ १८ ॥

अथ मूलाद्यनिष्टनक्षत्रोत्पन्नयोर्वधूवरयोः श्वशुरादिपीडकत्वं वसंततिलकयाह—

श्वश्रूविनाशमहिजौ सुतरां विधत्तः कन्यासुतौ निर्ऋतिजौ श्वशुरं हतश्च ॥ ज्येष्ठाभजाततनयास्व-

धवाग्रजं च शक्राग्निजा भवति देवरनाशकर्त्री ॥१९॥

श्वश्रूविनाशमिति ॥ अहिजौ आश्लेषानक्षत्रोत्पन्नौ कन्यापुत्रौ श्वश्वाः साक्षाद्वरस्य मातुः कन्याया वा साक्षान्मातुः विनाशं विधत्तः कुरुतः । तथा निर्ऋतिजौ मूलोत्पन्नौ श्वशुरं हतः नाशयतः । "जनकं जननीं हंति भर्तुर्मूलाहिधिष्ण्यजा ।" इति वसिष्ठोक्तेः । तुल्यन्यायत्वात्कन्याया अपि साक्षान्मातरम् । ज्येष्ठेति । ज्येष्ठानक्षत्रोत्पन्ना कन्या स्वधवाग्रजं भर्तुर्ज्येष्ठभ्रातरं हंति । शक्राग्निजा विशाखोत्पन्ना देवरस्य भर्तुः कनिष्ठभ्रातुर्नाशकर्त्री । उक्तं च । "ऐन्द्री पत्यग्रजं हंति देवरं तु द्विदैवजा ।" इति ॥ १९ ॥

एतदपवादमनुष्टुभाह—

द्वीशाद्यपादत्रयजा कन्या देवरसौख्यदा ॥
मूलांत्यपादसार्पाद्यपादजाते तयोः शुभे ॥२०॥

द्वीशाद्येति ॥ स्पष्टार्थम् । "न हंति देवरं कन्या तुला मिश्रा द्विदैवजा । तदंतपादजा त्याज्या दुष्टा वृश्चिकपुच्छवत् ॥" इति वृद्धनारदोक्तेः । मूलेति । मूलचतुर्थचरणोत्पन्नौ कन्यासुतौ श्वशुरसौख्यदौ । आश्लेषाप्रथमचरणोत्पन्नौ श्वश्वाः । नारदः । "सुतः सुता वा नियतं श्वशुरं हंति मूलजौ । तदंत्यपादजौ नैव तथाश्लेषाद्यपादजौ ॥" इति । पुंस्त्वमविवक्षितम् । ज्योतिर्निबंधे मौंजीबंधनानंतरं मूलाश्लेषादोषो नास्तीत्युक्तम् । "मूलव्यालोद्भवो दोषः पुंसां मौंज्यां विनश्यति ।" इति भूपालवल्लभवचनादिति । तन्न । मूलाश्लेषादोषः शूद्रविषयः पर्यवस्यति । तथा ज्येष्ठोत्पन्नः पुमान्पत्न्यग्रजमग्रजां वा हंति । विशाखोत्पन्नश्च पत्न्यनुजमनुजां वा हंति । उक्तं च कलत्रपटले । "पत्यग्रजामग्रजं वा हंति ज्येष्ठर्क्षजः पुमान् । तथा भार्यानुजां चैवानुजं हंति द्विदैवजा ॥" इत्युक्तम् । तत्परिहारश्च तत्रैव । "मूलांत्यपादजौ श्रेष्ठौ तथाश्लेषाद्यपादजौ । द्वीशांत्यपादजौ दुष्टौ तद्वज्ज्येष्ठांत्यपादजौ ॥" इति । ज्येष्ठाविशाखोत्पन्नपुंसोर्दोषतत्परिहारानिरूपणं ग्रन्थेष्वदृष्टत्वादुपेक्ष्यम् ॥ २० ॥

अथाष्टकूटानां नामान्यनुष्टुभाह—

वर्णो वश्यं तथा तारा योनिश्च ग्रहमैत्रकम् ॥
गणमैत्रं भकूटं च नाडी चैते गुणाधिकाः ॥ २१ ॥

वर्ण इति ॥ एते वर्णादिमैत्र्यां सत्यां गुणाधिका एकादिगुणाधिकाः स्युः । यथा वर्णमैत्र्यामेको गुणः वश्ये द्वावित्यादि ॥२१॥

अत्रादौ वर्णकूटं प्रमाणिकयाह—

द्विजा झषालिकर्कटास्ततो नृपा विशोऽङ्घ्रिजाः ॥
वरस्य वर्णतोऽधिका वधूर्न शस्यते बुधैः ॥ २२ ॥

द्विजा इति ॥ मीनकर्कटवृश्चिका द्विजाः ब्राह्मणाः । ततोऽनंतरमन्ये मेषसिंहधनराशयो नृपाः क्षत्रियाः । वृषकन्यामकरा विशो वैश्याः । मिथुनतुलाकुंभा अंघ्रिजाः शूद्राः । तत्र वरवधूराश्योर्वर्णौ ज्ञात्वा वरस्य वर्णतो ब्राह्मणादिका वधूरधिका ज्येष्ठवर्णा बुधैर्न शस्यते । किंतु समा हीना वा शस्यत इत्यर्थः । " एको गुणः सदृग्वर्णे तथा वर्णोत्तमे वरे । हीनवर्णे वरे शून्यं केऽप्याहुः सदृशे दलम् ॥ " इति ॥ २२ ॥

अथ वश्यकूटमिंद्रवज्रयाह—

हित्वा मृगेंद्रं नरराशिवश्याः सर्वे तथैषां जल-
जास्तु भक्ष्याः ॥ सर्वेऽपि सिंहस्य वशे विनालिं
ज्ञेयं नराणां व्यवहारतोऽन्यत् ॥ २३ ॥

हित्वेति ॥ नरराशयो मिथुनकन्यातुलाः एषां मेषादयः सर्वेऽपि सिंहं त्यक्त्वा वश्याः। ननु जलचराणां सहानवस्थानात्कथं वश्यत्वं तत्राह । जलजास्तु भक्ष्या इति । एषां नरराशीनां जलजा मकरकुंभमीनकर्कास्तु भक्ष्याः । किं पुनर्वश्या इति सूचयितुं तुशब्दः । सिंहस्यालिं वृश्चिकं विना सर्वे वश्याः । अन्यदनुक्तं चतुष्पदानां जलचराणां वश्यावश्यं नराणां मनुष्याणां व्यवहारतो ज्ञेयम् ।

वश्यकूटं वश्यभक्ष्यं वैरभेदेन त्रिधा । तत्र वरराशेः स्त्रीराशौ वश्ये सति गुणद्वयम् । भक्ष्य एको गुणः वैरे गुणाभावः ॥ २३ ॥

अथ ताराकूटमनुष्टुभाह—

कन्यर्क्षाद्वरभं यावत्कन्याभं वरभादपि ॥
गणयेन्नवहृच्छेषे त्रीष्विद्रिभमसत्स्मृतम् ॥ २४ ॥

कन्यर्क्षादिति ॥ कन्यानक्षत्राद्वरनक्षत्रं यावद्गणयेत् । तथा वरनक्षत्रादपि कन्यानक्षत्रं गणयेत् । ततोऽवशिष्टेंऽके नवभिर्भक्ते यदवशिष्टं तच्चेत्रिपंचसप्तमितं भवेत्तदाऽसदशुभं स्मृतम् । अन्यथा एकद्विचतुःषडष्टनवमितं चेत्तदा शुभम् । उभयत्रापि त्रिपंचाद्रिमिते शेषे तारामैत्री नास्त्येव अतो गुणाभावः । एकत्र चेत्तदार्धा मैत्री तदा सार्धैको गुणः । उभयत्रापि चेत्र्यादिशेषाभावः । तदा पूर्णमैत्रीत्यतो गुणत्रयम् ॥ २४ ॥

अथ योनिकूटं शार्दूलविक्रीडितद्वयेनाह—

अश्विन्यंबुपयोर्हयो निगदितः स्वात्यर्कयोः कासरः
सिंहो वस्वजपाद्भयोः समुदितो याम्यांत्ययोः कुंजरः ॥ मेषो देवपुरोहितानलभयोः कर्णांबुनोर्वानरः स्याद्वैश्वाभिजितोस्तथैव नकुलश्चांद्राब्जयोन्योरहिः ॥ २५ ॥ ज्येष्ठामैत्रभयोः कुरंग उदितो मूलार्द्रयोः श्वा तथा मार्जारोऽदितिसार्पयोरथ मघायोन्योस्तथैवोंदुरुः ॥ व्याघ्रो द्वीशभचित्रयोरपि च गौरर्यम्णबुध्न्यर्क्षयोर्योनिः पादगयोः परस्परमहावैरं भयोन्योस्त्यजेत् ॥ २६ ॥

अश्विन्यंबुपयोरिति । ज्येष्ठामैत्रभयोरिति च ॥ अश्विनीशततारकयोर्हयोऽश्वो योनिरुक्तः । एवं स्वातीहस्तयोः कासरो महिषः । “लुलायो महिषो वाहद्विषत्कासरसैरिभाः । ” इत्यमरोक्तेः । कर्णः

श्रवणः अंबु पूर्वाषाढा तयोर्वानरो मर्कटः । चांद्रं मृगः अब्जयोनिर्ब्रह्मा तद्भं रोहिणी तयोरहिः सर्पः। कुरंगो हरिणः अनुराधाज्येष्ठयोः । द्वीशभं विशाखाचित्रयोर्व्याघ्रः । बुध्न्यर्क्षमुत्तराभाद्रपदा अर्यमोत्तराफाल्गुनी तयोर्गौर्योनिः । अन्यत्स्पष्टम् । फलमाह । पादगयोरिति । एकस्मिन्पादे चरणे गतयोरुक्तनक्षत्रयोन्योः परस्परं महावैरं भवेत् । यथा । " अश्विन्यंबुपयोर्हयो निगदितः स्वात्यर्कयोः कासरः " इति पादः । तत्रोक्तयोर्भयोन्योरश्वमहिषयोर्महावैरम् । एवं सिंहहस्तिनोरित्यादि । एतत्फलमाह अत्रिः । " एकयोनिषु संपत्यै दंपत्योः संगमः सदा । भिन्नयोनिषु मध्यः स्यादरिभावो न चेत्तयोः ॥ योनेरथो वैरभावः स तु कार्ये वियोगदः । राशिवश्यं च यद्यस्ति कारयेन्न तु दोषभाक् ॥ " अत्रातिवैरवैरोदासीनमैत्रातिमैत्रक्रमेण गुणविभागः । गोव्याघ्रादीनामतिवैरं तत्र गुणाभावः । शुनकमार्जारादीनां वैरं तत्रैको गुणः । अश्वमेषादीनामौदास्यं तत्र गुणद्वयम् । गोमेषादीनां मैत्रं तत्र गुणत्रयम् । एकयोनौ अतिमैत्रं तत्र गुणचतुष्टयम् ॥ २५ ॥ २६ ॥

अथ ग्रहमैत्रीं शार्दूलविक्रीडिताभ्यामाह—

मित्राणि द्युमणेः कुजेज्यशशिनः शुक्रार्कजौ वैरिणौ सौम्यश्चास्य समो विधोर्बुधरवी मित्रे न चास्य द्विषत् ॥ शेषाश्चास्य समाः कुजस्य सुहृदश्चंद्रेज्यसूर्या बुधः शत्रुः शुक्रशनी समौ च शशभृत्सूनोः सिताहस्करौ ॥ २७ ॥ मित्रे चास्य रिपुः शशी गुरुशनिक्ष्माजाः समा गीष्पतेर्मित्राण्यर्ककुजेंदवो बुधसितौ शत्रू समः सूर्यजः ॥ मित्रे सौम्यशनी कवेः शशिरवी शत्रू कुजेज्यौ समौ मित्रे शुक्रबुधौ शनेः शशिरविक्ष्माजा द्विषोऽन्यः समः २८

मित्राणीति । मित्रे चेति ॥ द्युमणेः सूर्यस्य भौमगुरुचंद्राः मित्राणि । शुक्रशनी अस्य वैरिणौ । अस्य सौम्यो बुधः समः । विधोः चंद्रस्य बुधरवी मित्रे । च पुनरस्य विधोर्द्विषत् शत्रुर्नास्ति । मंगलगुरुशुक्रशनयः समा एव । अथ भौमस्य गुरुचंद्रसूर्याः मित्राणि । बुधः शत्रुः । शुक्रशनी समौ । अथ शशभृत्सूनोः बुधस्य सिताहस्करौ शुक्ररवी मित्रे । अस्य बुधस्य शशी शत्रुः । गुरुशनिभौमाः समाः । अथ गीष्पतेर्गुरोः सूर्यभौमचंद्राः मित्राणि । बुधशुक्रौ शत्रू । सूर्यजः शनिः समः । अथ कवेः शुक्रस्य बुधशनी मित्रे । चंद्रसूर्यौ शत्रू । कुजगुरू समौ । अथ शनेः शुक्रबुधौ मित्रे । रविचंद्रभौमा द्विषो वैरिणः । अन्यो गुरुः समः । अथ गुणविचारः । तत्रैकाधिपतित्वे परस्परमित्रत्वे पंच गुणाः । सममित्रत्वे चत्वारः । उभयसमत्वे त्रयो गुणाः । मित्रवैरे गुणद्वयम् । समवैरे एकगुणः । परस्परं वैरे गुणाभावः ॥ २७ ॥ २८ ॥

अथ गणकूटं वसंततिलकया शालिन्या चाह—

रक्षोनरामरगणाः क्रमतो मघाहिवस्विंद्रमूलवरुणानलतक्षराधाः ॥ पूर्वोत्तरात्रयविधातृयमेशभानि मैत्रादितींदुहरिपौष्णमरुल्लघूनि ॥ २९ ॥ निजनिजगणमध्ये प्रीतिरत्युत्तमा स्यादमरमनुजयोः सा मध्यमा संप्रदिष्टा ॥ असुरमनुजयोश्चेन्मृत्युरेव प्रदिष्टो दनुजविबुधयोः स्याद्वैरमेकांततोऽत्र ॥ ३० ॥

रक्षोनरेति । निजनिजेति ॥ क्रमतो रक्षोनरामरगणाः पादत्रयेणोच्यंते । तक्षा चित्रा । राधा विशाखा । मघादि एतत्पर्यंतं नक्षत्राणि रक्षोगणः । पूर्वात्रयमुत्तरात्रयं विधाता रोहिणी यमो भरणी ईश आर्द्रा एतानि भानि नरगणो मनुष्यगणः । मैत्रमनुराधा अदितिः पुनर्वसुः इंदुर्मृगः हरिः श्रवणः पौष्णं रेवती मरुत्स्वाती लघूनि अश्विनीपुष्यहस्ताः एतानि नव भान्यमरगणो देवगण

इति । निजेति । स्वस्वगणे विद्यमानयोः स्त्रीपुरुषनक्षत्रगणयोरत्युत्तमा प्रीतिः स्यात् । अमरमनुजयोर्देवमनुष्ययोः स्त्रीपुरुषयोः परस्परं प्रीतिर्मध्यमा स्यात । असुरमनुजयो राक्षसमनुष्ययोः स्त्रीपुरुषयोर्मृत्युरेव प्रदिष्टः । प्रबलदुर्बलन्यायेन मनुष्यगणस्यैव नाशः । शार्ङ्गीये । " रक्षोगणः पुमांश्चेत्स्यात्कन्या भवति मानवी । केऽपीच्छंति तदोद्वाहं व्यस्तं कोऽपीह नेच्छति ॥ " एतत्तुल्यन्यायाद्देवराक्षसयोरपि द्रष्टव्यम् । अस्यापवादमाह गर्गः । " रक्षोगणो यदा पुंसां कुमारी नृगणा भवेत् । सद्भकूटं खगप्रीतिर्योनिशुद्धं शुभं तदा ॥ " इति । अत्रेयं गुणकल्पना । नररक्षसोर्महद्वैरं तत्र गुणाभावः । देवरक्षसोर्वैरं तत्र गुणाभावः । देवमनुष्यत्वे चत्वारः । गणैकत्वे षड् गुणाः ॥ २९ ॥ ३० ॥

अथ राशिकूटमनुष्टुभाह—

मृत्युः षडष्टके ज्ञेयोऽपत्यहानिर्नवात्मजे ॥
द्विर्द्वादशे निर्धनत्वं द्वयोरन्यत्र सौख्यकृत् ॥ ३१ ॥

मृत्युरिति ॥ स्त्रीपुरुषयोः परस्परं षष्ठाष्टमराशित्वे सति मृत्युर्ज्ञेयः । एवं नवात्मजे नवपंचमेऽपत्यानां हानिः । एवं द्विर्द्वादशे निर्धनत्वं दारिद्र्यं स्यात् । अन्यत्र तृतीयैकादशे चतुर्थदशमे समसप्तमे वा सति सौख्यकृत्पाणिपीडनं स्यात् ॥ ३१ ॥

अथास्य दुष्टभकूटस्य परिहारं शार्दूलविक्रीडितेनाह—

प्रोक्ते दुष्टभकूटके परिणयस्त्वेकाधिपत्ये शुभोऽथो
राशीश्वरसौहृदेऽपि गदितो नाड्यृक्षशुद्धिर्यदि ॥
अन्यर्क्षांशपयोर्बलित्वसखिते नाड्यृक्षशुद्धौ तथा
ताराशुद्धिवशेन राशिवशता भावे निरुक्तो बुधैः ३२

प्रोक्ते इति ॥ स्त्रीपुरुषराश्योर्द्वयोरेकाधिपत्ये सति एकस्वामिकत्वे सति प्रोक्ते दुष्टभकूटे षडष्टकादावपि विवाहः शुभो गदितः । यथा । मेषवृश्चिकयोस्तुलावृषभयोर्वा नवपंचमे त्वेकाधिपत्याभावः ।

द्विर्द्वादशे मकरकुंभयोः अथवा राशीश्वरयोः सौहृदे मैत्रेऽपि यदि नाडीनक्षत्रयोः शुद्धिर्वेधो न भवेत्तदा दुष्टभकूटके विवाहः शुभः । यथा षष्ठाष्टके मीनसिंहराश्योर्नवपंचमे मेषधनुषोर्द्विर्द्वादशे मीनमेषयोरित्यादौ । तथा च वसिष्ठः । " द्विर्द्वादशे वा नवपंचमे वा षट्काष्टके राक्षसयोषितो वा । एकाधिपत्ये भवनेशमैत्रे शुभाय पाणिग्रहणं विधेयम् ॥ " इति । अन्यच्च । " विषमात्कन्यकाराशेः षष्ठं षष्ठाष्टकं न सत् । समात्षष्ठं शुभं ज्ञेयं विपरीतं न शोभनम् ॥ " अन्यर्क्षेशपयोरिति । अन्यर्क्षे प्रीतिषट्काष्टकादिभ्योऽन्यराशौ राशिस्वामिनोः परस्परशत्रुत्वे वा सति अंशपयोस्तद्राशिनवांशस्वामिनोर्बलित्वसखिते स्याताम् । बलित्वं च सखिता च प्रथमाद्विवचनांतं पदम् । बलित्वमुच्चादिस्थानस्थितत्वेन सवलत्वं सखिता परस्परमैत्री ते उभे चेद्भवतः । तथा नाड्यृक्षशुद्धौ नाडीनक्षत्रयोर्वेधाभावे सति तथा ताराशुद्धिवशे च सति राशिवशताभावे च राशिवश्यत्वे च सति दुष्टभकूटकेऽपि विवाहः शुभो निरुक्तः । उक्तं च जगन्मोहने वसिष्ठेन । " राशिनाथे विरुद्धेऽपि सबलावंशकाधिपौ । तन्मैत्रेऽपि च कर्तव्यं दंपत्योः सुखमिच्छता ॥ " इति । अन्यच्च । तस्मिन्नेव प्रकरणे वसिष्ठवाक्यम् । " राशिनाथे विरुद्धेऽपि मित्रत्वे चांशनाथयोः । विवाहं कारयेद्धीमान् दंपत्योः सौख्यवर्द्धनम् ॥ " इति । अत्रैकस्मिन्नेव प्रकरणे वसिष्ठवाक्ययोरन्यतरवाक्यानर्थक्यापत्तेरुपसंहारन्यायो न प्रवर्त्तते।तेनावश्यं वाक्यद्वयस्य भिन्नार्थत्वं वाच्यम् । तत्र कस्य कोऽर्थ इति संदेहे न्यूनार्थं द्वितीयं वचनं केवलग्रहवैरापवादकं तुल्यबलत्वात् । अंशनाथसबलत्वाभिधायकं प्रथमवचनमुभयविरोधस्य ग्रहवैरराशिवैररूपस्यापवादकम् । तेन राशिनाथे विरुद्धेऽपीत्यत्र राशी च नाथौ च एतेषां समाहारो राशिनाथं तस्मिन् राशिनाथे । तथा चायमर्थः । राशीविरुद्धौ षट्काष्टकादिना नाथौ विरुद्धौ कयोरित्याकांक्षायां ययोः षट्कादिविचारस्तयोरेव सन्निहितत्वाद्ग्रहणम् । तयो राश्योर्नाथौ विरुद्धौ मित्राणि द्युमणेरित्यादिना परस्परं शत्रू स्यातां तद्राशिनवांशस्वामिनोः सब-

लत्वे मित्रत्वे च समुच्चिते सति विवाहः शुभः । नन्वस्मिन्वाक्ये क्लिष्टव्याख्याने किं मानम् । उच्यते । अंशनाथसबलत्वस्याधिककरणमेव । तच्च युगपदुत्पन्नस्य दोषद्वैविध्यस्य राशिविरोधग्रहविरोधरूपस्य परिहारविरोधरूपमित्यवगम्यते । अस्मिन्नपि पक्षे नाडीशुद्धिस्ताराशुद्धिः राशिवशता चापेक्षितेति ॥ ३२ ॥

अथ दुष्टानां गणकूटभकूटग्रहकूटानां परिहारं शालिन्याह—

मैत्र्यां राशिस्वामिनोरंशनाथद्वंद्वस्यापि स्याद्गणानां न दोषः ॥ खेटारित्वं नाशयेत्सद्भकूटं खेटप्रीतिश्चापि दुष्टं भकूटम् ॥ ३३ ॥

मैत्र्यामिति ॥ स्त्रीपुरुषयोः राशिस्वामिनोर्मैत्र्यां सत्यां तथा राशिनवांशनाथयोर्द्वंद्वस्यापि मैत्र्यां सत्यां दुष्टगणानां दोषो न स्यात् । अत्रिः । "राशीशयोः सुहृद्भावे मित्रत्वे चांशनाथयोः । गणादिदौष्टयेऽप्युद्वाहः पुत्रपौत्रप्रवर्द्धनः ॥" अथ सद्भकूटं तृतीयैकादशादिकं खेटारित्वं ग्रहवैरकृतं दोषं नाशयेत् । एवमेव खेटप्रीतिः ग्रहमैत्री चापि दुष्टं भकूटं षडष्टादिकं नाशयेत् । असद्भकूटे गुणाभावः । भकूटदोषापवादे चत्वारो गुणा इति ॥ ३३ ॥

अथ नाडीकूटं स्रग्धरयाह—

ज्येष्ठारौद्रार्यमांभःपतिभयुगयुगं दास्रभं चैकनाडी पुष्येंदुत्वाष्ट्रमित्रांतकवसुजलभं योनिबुध्न्ये च मध्या ॥ वाय्वग्निव्यालविश्वोडुयुगयुगमथो पौष्णभं चापरा स्याद्दंपत्योरेकनाड्यां परिणयनमसन्मध्यनाड्यां हि मृत्युः ॥ ३४ ॥

ज्येष्ठारौद्रेति ॥ ज्येष्ठा रौद्रमार्द्रा अर्यमोत्तराफाल्गुनी अंभःपतिर्वरुणः शततारका एभ्यो नक्षत्रेभ्यो युगयुगं द्वयं द्वयं ज्येष्ठा मूलम् उत्तरा हस्तः आर्द्रा पुनर्वसुः शततारा पूर्वाभाद्रपदा दास्रभमश्विनी च

एतन्नक्षत्रनवकं परस्परमेकनाडीत्युच्यते । पुष्यमृगचित्रानुराधाभरणीधनिष्ठापूर्वाषाढापूर्वाफाल्गुनीउत्तराभाद्रपदा एतन्नक्षत्रनवकं मध्यनाडीत्युच्यते । अथ वाय्वग्निव्यालविश्वोडुयुगयुगं वायुः स्वाती तद्युगं द्वयं स्वाती विशाखा अग्निः कृत्तिका रोहिणी व्याल आश्लेषा मघा विश्वोडुयुगं विश्वे उत्तराषाढा श्रवणश्च पौष्णभं रेवती एतन्नक्षत्रनवकम् अपरा तृतीयैकनाडीत्युच्यते । एतत्फलमाह । दंपत्योः स्त्रीपुंसयोरेकनाड्यां परिणयनमसद्दुष्टफलं स्यात् । मध्यनाड्यां हि निश्चयेन मृत्युर्द्वयोरपि स्यात् । नारदेन तु विशेष उक्तः । "चतुस्त्रिद्व्यंघ्रिभोत्थायाः कन्यायाः क्रमशोऽश्विभात् । वह्निभादिंदुभान्नाडी त्रिचतुःपंचपर्वसु ॥ गणयेत्संख्यया चैकनाड्यां मृत्युर्न संशयः । एकनाडीविवाहश्च गुणैः सर्वैः समन्वितः ॥ वर्जनीयः प्रयत्नेन दंपत्योर्निधनं यतः । " इति । अमुमर्थं स्पष्टमाह गर्गः । " चतुष्पात्कन्यकाऋक्षं गणयेदश्विभादिकम् । त्रिभं सव्यापसव्येन भिन्नं पर्व शुभावहम्[1]॥ कन्यकाभं त्रिपाच्चेत्स्याद्गणयेत्कृत्तिकादिकम् । चतुर्भिः पर्वभिस्तद्वदभिजित्तारकान्वितम् ॥ कन्यकर्क्षं[2] द्विपाच्चेत्स्याद्गणयेत्सौम्यभादिकम् । पंचभिस्त्ववरोहे तु पंचमांगुलिवर्जितम् ॥ "एतत्फलमप्याह गर्गः । "संश्लिष्टा मध्यनाडी तु पुरुषं हंति वेगतः । संश्लिष्टा पार्श्वनाडी तु कन्यकां हंत्यसंशयम् ॥ " इति । " आसन्ना त्वेकनाडी स्यादासन्नमृतिदायिनी । दूरस्था चैकनाडी स्याद् दूरस्थानिष्टकारिणी ॥ " इति । नाडीविचारे चंडेश्वरः । " पृष्ठे मध्ये शुभसमभोगः क्रोडे वनितावित्तवियोगः । मध्ये रेखे भवति विवाहे उभयोर्मरणं वदति वराहः ॥ अश्व्यादिनाडीवेधर्क्षं क्रमात्षष्ठद्वितीयकम् । याम्यादि तुर्यतुर्यं च कृत्तिकादि द्विषष्ठकम् ॥ " अन्यच्च । "अर्केंदुजक्षोणितनूजजीवाः केतुः सितो राहुशशांकसौराः । जन्मादिनाडीत्रितये शुभाः स्युः शुभे शुभं स्यादशुभं शुभं च ॥" तद्यथा। अर्कः १ । १० । १९ बुधः २ । ११ । २० मंगल ३ । १२ । २१

[1] सुखावहमित्यपि पाठः । [2] कन्यकर्क्षमित्यपि पाठः ।

बृहस्पतिः ४ । १३ । २२ केतुः ५ । १४ । २३ शुक्रः ६ । १५ २४ राहुः ७ । १६ । २५ चन्द्रः ८ । १७ । २६ शनिः ९ । १८ २७ शुभग्रहनाडीनक्षत्रे शुभकार्यं कुर्यान्नाशुभग्रहनाडीनक्षत्रे इत्यर्थः । " चतुर्नाडी त्वहल्यायां पांचाले पंचनाडिका । त्रिनाडी सर्वदेशेषु वर्जनीया प्रयत्नतः ॥ " इति । मनुस्तु । " अहल्यायां चतुर्नाडीसंयोगः कालमृत्युदः । एष योगोऽन्यदेशेषु ह्यपमृत्युफलप्रदः ॥ पंचनाडीसमायोगः पांचाले कालदंडदः । इतरत्र समायोगो दुःखदारिद्र्यरोषकृत् ॥ त्रिनाड्यां तु समायोगः सर्वत्रानिष्टकारकः । " इति । आवश्यकत्वे गुरुः । " दोषापनुत्तये नाड्यां मृत्युंजयजपादिकम् । विधाय ब्राह्मणांश्चैव तर्पयेत्कांचनादिना ॥ हिरण्मयीं दक्षिणां च दद्याद्वर्णादिकूटके । गावोऽन्नवसनं हेम सर्वदोषापहारकम् ॥ " इति । अन्यच्च । " षट्काष्टके गोमिथुनं प्रदद्यात्कांस्यं सरूप्यं नवपंचमेऽपि । वस्त्रं प्रदेयं कनकं च शक्त्या द्विर्द्वादशे ब्राह्मणतर्पणं च ॥ " इति ॥ ३४ ॥

अथेंद्रवज्रया पूर्वमध्यापरभागयोगीनि भान्याह—

पौष्णेशशाक्राद्रससूर्यनंदा पूर्वार्द्धमध्यापरभागयुग्मम् ॥ भर्त्ता प्रियः प्राग्युजि भे स्त्रियाः स्यान्मध्ये द्वयोः प्रेमपरे प्रिया स्त्री ॥ ३५ ॥

पौष्णेति ॥ पौष्णाद्रेवत्याः षड्भम् भानि जात्यभिप्रायमेकवचनम् । पूर्वार्द्धयोगीनि ज्ञेयानि । आर्द्रादिद्वादश मध्यभागयोगीनि ज्ञेयानि । ज्येष्ठादीनि नव अपरभागयोगीनि ज्ञेयानि । फलमाह । भर्त्ता प्रिय इति । अयं भावः । राज्ञामंतःपुरस्थस्त्रीसमागमे गणिकादिसमागमे वा पूर्वार्द्धयुजि नक्षत्रे सति स्त्रीणां भर्त्ता प्रियः । मध्यभागयुजि भे परस्परं प्रीतिर्भवेत् परे परभागयुजि भे स्त्री नृणां प्रिया भवेदिति । एवं वधूवरयोर्नवसमागमेऽपि ज्ञेयमिति रत्नमालाटीकायां महादेवेनोक्तम् ॥ ३५ ॥

अथ प्राच्यसंमतं वर्गकूटमार्ययाह—

अकचटतपयशवर्गाः खगेशमार्जारसिंहशुनाम् ॥
सर्पाखुमृगावीनां निजपंचमवैरिणामष्टौ ॥ ३६ ॥

अकचटेति ॥ अज्वर्गोऽवर्गसंज्ञकः कुचुटुतुपु इति पंच वर्गाः एको यवर्गोऽन्यः शवर्गः एवमष्टौ वर्गाः तत्र अवर्गः खगेशस्य गरुडस्य । कवर्गो मार्जारस्य । चवर्गः सिंहस्य । टवर्गः शुनः । तवर्गः सर्पस्य । पवर्ग आखोर्मूषकस्य । यवर्गो मृगस्य । शवर्गोऽवेर्मेषस्य । अत्र निजात्स्वस्मात्पंचमा वैरिणो येषां ते तथोक्ताः । गरुडसर्पयोर्मार्जारमूषकयोः सिंहमृगयोः श्वमेषयोः परस्परं महावैरमित्यर्थः । स्त्रीपुंसयोर्नक्षत्रद्वयं भक्ष्यभक्षकवर्गे चेत् तदा अशुभं यदा त्वेकवर्गे तदा शुभम् । एतच्च स्वामिसेवकयोरपि विचार्यम् ॥ ३६ ॥

इदानीं नक्षत्रराश्यैक्ये विशेषं शालिन्याह--

राश्यैक्ये चेद्भिन्नमृक्षं द्वयोः स्यान्नक्षत्रैक्ये राशियुग्मं तथैव ॥ नाडीदोषो नो गणानां च दोषो नक्षत्रैक्ये पादभेदे शुभं स्यात् ॥ ३७ ॥

राश्यैक्ये चेदिति ॥ द्वयोर्वधूवरयोरेकराशित्वे सति यदि भिन्नमृक्षं स्यात्तदा नाडीदोषो गणानां च दोषो न स्यात् । यथा शततारापूर्वाभाद्रपदापादत्रयं च । तथैव नक्षत्रैक्ये राशियुग्मं राशिद्वयं चेत्स्यात्तदापि प्रागुक्तो दोषो न स्यात् । यथा पूर्वाभाद्रपदापादत्रयं चतुर्थचरणश्च । अत्रापि विशेषमाह गर्गः । " एकराशौ पृथग्धिष्ण्ये पुंतारा प्रथमा भवेत् । अतीवशोभना प्रोक्ता स्त्रीतारा चेत्त्वशोभना ॥ " अथैकराशिनक्षत्रैक्येऽपवादमाह । नक्षत्रैक्य इति । वधूवरयो राश्यैक्ये नक्षत्रैक्ये च यदि चरणभेदस्तदापि शुभं स्यात् । जन्मनक्षत्राज्ञाने उपायमाह वसिष्ठः । " अज्ञातजन्मनां नृणां नामभे परिकल्पना । तेनैव चिंतयेत्सर्वं राशिकूटादि जन्मवत् ॥

जन्मभं जन्मधिष्ण्येन नामभं नामधिष्ण्यतः । व्यत्ययेन यदा योज्यं दंपत्योर्निधनप्रदम् ॥" इति ॥ ३७ ॥

सेवकादिभस्य स्वाम्यादिभात्पूर्वत्वे विशेषं वसंततिलकयाह--

सेवाधमर्णयुवतीनगरादिभं चेत्पूर्वं हि भृत्यधनिभर्तृपुरादिसद्भात् ॥ सेवाविनाशधननाशनभर्तृनाशग्रामादिसौख्यहृदिदं क्रमशः प्रदिष्टम् ॥ ३८ ॥

सेवाधमर्णेति ॥ स्पष्टार्थम् । तथा चोक्तं डामरसंग्रहे । "भामिनीजन्मनक्षत्राद्द्वितीयं पतिजन्मभम् । न शुभं भर्तृनाशाय कथितं ब्रह्मयामले ॥ प्रथमं सेव्यजन्मर्क्षं द्वितीयं सेवकस्य च । न सेवा सुस्थिरा तस्य जलबुद्बुदवत्प्रिये ॥" इति । "ऋणग्राहकजन्मर्क्षं प्रथममृणदस्य भात् । द्वितीयमृणसंबंधो न कर्तव्यः कदाचन ॥ कदाचिद्द्रव्यलोभेन क्रियते नैव लभ्यते । पार्वतीप्राणनाथेन प्रोक्तं डामरसंग्रहे ॥ ग्रामभं प्रथमं यस्य द्वितीयं जन्मभं भवेत् । न ग्राह्यः सर्वथा ग्रामो यतः प्राप्यार्थनाशदः ॥" इति ॥ ३८ ॥

अथ राशिस्वामिनो नवांशविधिं च मंजुभाषिण्याह--

कुजशुक्रसौम्यशशिसूर्यचंद्रजाः कविभौमजीवशनिसौरयो गुरुः ॥ इह राशिपाः क्रियमृगास्यतौलिकेंदुभतो नवांशविधिरुच्यते बुधैः ॥ ३९ ॥

कुजशुक्रेति ॥ स्पष्टार्थम् । क्रियमृगास्येति । क्रियो मेषः मृगास्यो मकरः तौलिकं तुला इंदुभं कर्कः एभ्यो राशिभ्यो बुधैर्नवांशविधिरुच्यते । मेषे मेषादेव वृषे मकरात् मिथुने तुलातः कर्के कर्कादेव एवं सिंहे मेषात् कन्यादिषु मकरादिषु मकरादिभ्यः एवमेव धनुरादिष्वपि मेषादिभ्य एव ॥ ३९ ॥

अथ होरां गायत्रीच्छंदोभेदेन शशिवदनावृत्तेनाह--

समगृहमध्ये शशिरविहोरा ॥
विषमभमध्ये रविशशिनोः सा ॥ ४० ॥

समगृहेति ॥ पंचदशभागमितैकैका होरा । ततः समराशिमध्ये प्रथमा चंद्रस्य । द्वितीया सूर्यस्य । विषमराशिमध्ये प्रथमा रवेरपरा चंद्रस्येत्यर्थः ॥ ४० ॥

अथ त्रिंशांशद्रेष्काणान्वसंततिलकयाह––

शुक्रज्ञजीवशनिभूतनयस्य बाणशैलाष्टपंचविशिखाः समराशिमध्ये ॥ त्रिंशांशको विषमभे विपरीतमस्माद्द्रेक्काणकाः प्रथमपंचनवाधिपानाम् ॥४१॥

शुक्रेति॥ समराशिमध्ये क्रमेण प्रथमतः पंचांशानां शुक्रः स्वामी ततः शैलानां सप्तानां बुधः ततोऽष्टानां गुरुः ततः पंचानां शनिः ततः पंचानां भौमः । विषमभे तु अस्मात्समराशेर्विपरीतं ज्ञेयम् । प्रथमतः पंचानां भौमः ततः पंचानां शनिः ततोऽष्टानां जीवः ततः सप्तांशानां बुधः ततः पंचांशानां शुक्रः । अयं त्रिंशांशकसंज्ञः । द्रेष्काणका[1] इति । अस्य प्रमाणं दशांशाः । तत्र प्रथमदशांशाः प्रथमो द्रेष्काणः स प्रथमस्य स्वाधीशस्य । ततो दशांशाः विंशतिभागपर्यंतं द्वितीयो द्रेष्काणः स स्वराशितः पंचमराशीश्वरस्य-ततो विंशतिभागानंतरं दशांशास्तृतीयो द्रेष्काणः स स्वराशेर्नवमाधीश्वरस्य । यथा मेषे प्रथमद्रेष्काणो भौमस्य । द्वितीयः सूर्यस्य । तृतीयो गुरोरिति ॥ ४१ ॥

अथ द्वादशांशं षड्वर्गोपसंहारं च सफलं वसंततिलकयाह––

स्याद्द्वादशांश इह राशित एव गेहं होराथ दृक्कनवमांशकसूर्यभागाः ॥ त्रिंशांशकश्च षडिमे कथितास्तु वर्गाः सौम्ये शुभं भवति चाशुभमेव पापैः ४२

स्याद्वादशांश इति ॥ इह षड्वर्गे द्वादशांशः राशितः स्वराशेरेव सार्द्धभागद्वयात्मको ज्ञेयः । मेषस्य मेषादिः वृषस्य वृषादिरित्यर्थः । गेहं होरा दृक्कः नवमांशः द्वादशांशः त्रिंशांशः इमे षड्वर्गाः

[1] द्रेष्काणकाः इत्यपि पाठः ।

कथिताः । एते वर्गाः सौम्यग्रहाणां चेद्भवंति तदा शुभम् । पापानां चेदशुभम् । मिश्राश्चेदधिकवर्गसदृशं फलम् । अत्र नारदादिभिरेकविंशतिर्महादोषा उक्ताः । यथा "पंचांगशुद्धिरहितो दोषस्त्वाद्यः प्रकीर्तितः । उदयास्तशुद्धिरहितो द्वितीयः सूर्यसंक्रमः ॥ तृतीयः पापषड्वर्गो भृगुः षष्ठः कुजोऽष्टमः । गंडांतं कर्तरीरिःफषडष्टेंदुश्च संग्रहः ॥ दंपत्योरष्टमं लग्नं राशिर्विषघटी तथा । दुर्मुहूर्तो वारदोषाः खार्जूरिकसमांघ्रिभम् ॥ ग्रहणोत्पातभं क्रूरविद्धर्क्षं क्रूरसंयुतम् । कुनवांशो महापातवैधृतावेकविंशतिः ॥" इति । अन्यैस्तु दश दोषा उक्ताः । "वेधश्च लत्ता च तथा च पातः खार्जूरयोगं दशयोगचक्रम् । पुनश्च जामित्रमुपग्रहाश्च बाणाख्यवज्रौ दश चैव दोषाः ॥" इति । अत्र ग्रंथकृता लक्षणस्य पृथग्वक्तव्यत्वाद्दोषनामानि नोक्तानि । तत्र पंचांगशुद्धिदुर्मुहूर्त्तवारदोषग्रहणोत्पातनक्षत्रदोषा आद्ये शुभाशुभप्रकरणे निरूपिता एवेति पुनर्नोच्यंते । दुर्मुहूर्त्तवारदोषयोः पुनरभिधानप्रयोजनं तत्रैव वक्ष्यामः । तत्र पापषड्वर्गाख्यो दोषः कुजशुक्रेत्यादिभिश्चतुर्भिः श्लोकैर्निरूपितः ॥ ४२ ॥

अथ गंडांतदोषं शार्दूलविक्रीडितेनाह—

ज्येष्ठापौष्णभसार्पभांत्यघटिकायुग्मं च मूलाश्विनी पित्र्यादौ घटिकाद्वयं निगदितं तद्भस्य गंडांतकम् ॥ कर्काल्यंडजभांततोऽर्धघटिका सिंहाश्वमेषादिगा पूर्णांताद्घटिकात्मकं त्वशुभदं नंदातिथेश्चादिमम् ॥ ४३ ॥

ज्येष्ठापौष्णेति ॥ गंडांतं नाम संधिविशेषः स चानेकविधः नक्षत्रतिथिलग्नसंधिः । तथा योगकरणवर्षायनर्तुमासपक्षदिनरात्रिमध्याह्नप्रातःसायंनिशीथसंधिश्चेति । तत्र नक्षत्रतिथिलग्नसंधिर्गंडांतसंज्ञ उच्यते । ज्येष्ठा पौष्णभं रेवती सार्पभमाश्लेषा एतेषामंत्यघटिकाद्वयम् । तथा मूलाश्विनीमघानामादौ घटिकाद्वयं तद्भस्य नक्ष-

त्रस्य गंडांतं ज्ञेयम् । यथा रेवत्यश्विन्योराश्लेषामघयोर्ज्येष्ठामूलयो-रंतरालवर्ति घटीचतुष्टयं नक्षत्रगंडांतमशुभदमित्यर्थः । अथ लग्नगं-डांतं कर्केति । कर्कः अलिर्वृश्चिकः अंडजो मीनः । "मीनो वैसा-रिणोऽण्डजः " इत्यभिधानात् । एषां लग्नानामंततोऽर्धघटिका । सप्तम्यर्थे तसिः । अंतेऽर्धघटिका । तथा सिंहमेषौ प्रसिद्धौ अश्वो धनुः एषां लग्नानामादिगतार्धघटिका लग्नगंडांतम् । यथा कर्कसिं-हयोर्मीनमेषयोर्वृश्चिकधनुषोश्चांतरालवर्तिन्येका घटिका लग्नगंडांतम-शुभदमित्यर्थः । पूर्णान्तादिति । पूर्णाः पंचमीदशमीपंचदश्यस्ता-सामंते घटिकैका तथा नंदाः प्रतिपत्षष्ठ्येकादश्यः तासामादिग-तैका घटिका तिथिगंडांतं नाम । यथा पंचमीषष्ठ्योर्दशम्येकाद-श्योः पंचदशीप्रतिपदोस्तिथ्योरंतरालवर्ति घटीद्वयं तिथिगंडातम-शुभमित्यर्थः । एवं गंडांतसंज्ञः । संधिः । अतोऽन्येऽपि संधयो वसिष्ठेनोक्ताः । "पक्षोऽब्दसंधिस्त्रिदिनं च माससंधिस्त्रिनाड्यः खलु संध्ययोश्च । नाड्यश्चतस्रस्तिथिऋक्षयोगसंधिस्तदर्धं करणस्य संधिः ॥ पक्षांते पुत्रनाशः स्यान्मासांते तु धनक्षयः । वर्षांते वर्ग-नाशः स्यात्करणात्सर्वनाशनम् ॥ " इति । आवश्यकत्वे तु । "न-क्षत्रयोगतिथिसंधिषु नाडिकैका तिथ्यष्टविंशतिपलैः सहितोभयत्र । कर्कालिमीनतनुसंधिषु दिक्पलानि वर्ज्यानि शेषविवरेषु च पंच पंच ॥ " इति । वासनासिद्धं केशवार्कवाक्यमनुसर्तव्यम् । गंडां-तपरिहारमाह वसिष्ठः । " गंडांतदोषमखिलं मुहूर्तोऽभिजिदाह्वयः । हंति यद्वन्मृगं व्याधः पक्षिसंघमिवाखिलम् ॥ " इति ॥ ४३ ॥

अथ कर्त्तरीदोषमनुष्टुभाह—

लग्नात्पापावृज्वनृजू व्ययार्थस्थौ यदा तदा ॥
कर्तरी नाम सा ज्ञेया मृत्युदारिद्र्यशोकदा ॥ ४४ ॥

लग्नात्पापाविति ॥ यदा पापग्रहौ ऋज्वनृजू लग्नाद्व्ययार्थस्थौ द्वादशस्थः पापग्रह ऋजुमार्गी द्वितीयस्थः पापोऽनृजुर्वक्री स्यात्तदा कर्त्तरी नाम दोषः स्यात् । मृत्युदारिद्र्यशोकदा भवेत् । कर्त्तरीका-

रकौ ग्रहावुभावपि वक्रिणौ शीघ्रगौ वा तदा कर्त्तरी नेत्याह । वसिष्ठः । " लग्नस्य पृष्ठाग्रगयोरसाध्वोः सा कर्त्तरी स्यादृजुवक्रगत्योः । तावेव शीघ्रौ यदि वक्रचारौ न कर्त्तरी चेति पितामहोक्तिः ॥ " इति । इयं कर्तरी चंद्रस्यापि द्रष्टव्या । कश्यपः । "चंद्रस्य कर्त्तरी तद्वच्छुभदृष्टा न दोषदा । " इति । परंतु लग्नस्य चंद्रस्य वा क्रूरमध्यगतत्वदोषोऽस्त्येव । कर्तरीतः स्वल्पफलः कन्यानाशकरत्वात् । " क्रूरग्रहमध्यगते लग्ने चंद्रेऽथ वा करग्रहणम् । ते यमसदनाभिमुखं गमनं चेच्छंति कन्यायाः ॥ " इति वसिष्ठोक्तेः । कर्त्तरीदोषापवादमग्रे स्वयमपि वक्ष्यति ॥ ४४ ॥

अथ सग्रहदोषमनुष्टुभाह—

चंद्रे सूर्यादिसंयुक्ते दारिद्र्यं मरणं शुभम् ॥
सौख्यं सापत्न्यवैराग्ये पापद्वययुते मृतिः ॥४५॥

चंद्रेति ॥ सूर्ययुक्ते चंद्रे दारिद्र्यं स्यात् । एवं भौमादिषु मरणादिफलं क्रमेण स्यादित्यर्थः । पापद्वययोगे चंद्रस्य मृतिः स्यात् । नारदादिभिर्बुधगुरुराहित्यफलमशुभमुक्तम् । अत्र तु श्रीपतिवाक्यानुरोधात् वसिष्ठेन च केचिन्मते शुभत्वोक्तेश्च शुभमुक्तम् । श्रीपतिः । " शुभं च दंभोलिभृदीज्यविद्भ्याम् । " इति । वसिष्ठः । "दारिद्र्यं रविणा कुजेन मरणं सौम्येन न स्युः प्रजा दौर्भाग्यं गुरुणा सितेन सहिते चंद्रे ससापत्नकम् । प्रव्रज्यार्कसुतेन सद्ग्रहयुजौ वांछंति केचिच्छुभं द्व्याद्यैर्मृत्युरसद्ग्रहैः शशियुतैर्दीर्घः प्रवासः शुभैः ॥ " इति । एतत्परिहारो नारदेनोक्तः । " स्वक्षेत्रगः स्वोच्चगो वा मित्रक्षेत्रगतो विधुः । युतिदोषाय न भवेद्दंपत्योः श्रेयसे तदा ॥ " इति ॥ ४५ ॥

अथाष्टमलग्नदोषं सापवादमनुष्टुभाह—

जन्मलग्नभयोर्मृत्युराशौ नेष्टः करग्रहः ॥
एकाधिपत्ये राशीशमैत्रे वा नैव दोषकृत् ॥ ४६ ॥

जन्मलग्नभयोरिति ॥ जन्मलग्नजन्मराशिसंबंधिनि मृत्युराशावष्टमराशावष्टमलग्ने करग्रहो विवाहो नेष्टः । अत्र जन्मलग्ने जन्मराशौ च विशेषमाह नारदः । " जन्मराश्युद्गमे नैव जन्मलग्नोदयः शुभः । तयोरुपचयस्थानं यदि लग्नगतं शुभम् ॥ " अष्टमलग्नापवादमाह । एकेति । जन्मराशिजन्मलग्नयोरन्यतरस्य विवाहलग्नस्य च स्वाम्यैक्ये सति यथा मेषवृश्चिकयोः तथा तयो राशीश्वरयोर्मैत्रे सति यथा सिंहमीनयोः एतादृशे विषये अष्टमलग्नदोषो न स्यात् ॥ ४६ ॥

अथोत्तरार्धोक्तमेवार्थं स्पष्टमुपजातिकयाह—

मीनोक्षकर्कालिमृगस्त्रियोऽष्टमं लग्नं यदा नाष्टमगेहदोषकृत् ॥ अन्योन्यमित्रत्ववशेन सा वधूर्भवेत्सुतायुर्गृहसौख्यभागिनी ॥ ४७ ॥

मीनोक्षेति ॥ उक्षा वृषः स्त्री कन्या एते राशयो यद्यष्टमं लग्नं स्युस्तदाष्टमलग्नदोषकृन्न भवेत् । यथा सिंहान्मीन इत्यादि । कुत इत्यत आह । अन्योऽन्येति । परिहारांतरमाह गुरुः । " लग्नादष्टमराशीशः केंद्रगः शुभवीक्षितः । यद्यष्टमगतस्योक्तदोषमाशु व्यपोहति ॥ रंध्रेशः स्वशुभांशस्थस्तुंगस्वक्षेत्रमित्रगः । अष्टमस्थानदोषो हि विनश्यति न संशयः ॥ " इति ॥ ४७ ॥

अथान्यदपि कुसुमविचित्राच्छंदसाह—

मृतिभवनांशो यदि च विलग्ने तदधिपतिर्वा न शुभकरः स्यात् ॥ व्ययभवनं वा भवति तदंशस्तदधिपतिर्वा कलहकरः स्यात् ॥ ४८ ॥

मृतीति ॥ अष्टमभवननवांशो यदि लग्ने स्यादथवाष्टमलग्नेशः स्यात्तदा शुभकरो न स्यात् । अथ व्ययभवनं जन्मलग्नजन्मराशिभ्यां द्वादशभवनम् अथ वा व्ययभवनांशः अथवा तत्स्वामी यदि लग्ने स्यात्तदा कलहकृत्स्यात् । कश्यपः । " दंपत्योरष्टमे लग्नराशौ वापि तदंशके । तदीशे वा लग्नगते तयोर्मृत्युर्न संशयः ॥ " इति ।

"तथैव द्वादशे लग्ने तदंशे वा तदीश्वरे। विवाहलग्नगे नैःस्व्यं नित्यः स्यात्कलहो द्वयोः॥" इति॥ ४८॥

अथ विषघटीदोषं वंशस्थाभ्यामिंद्रवज्रया चाह--

खरामतो ३० त्यादितिवह्निपित्र्यभे खवेदतः ४० के रदत ३२ श्च सार्पभे॥ खबाणतो ५० श्वे धृतितो १८ र्यमांबुपे कृते २० भंगत्वाष्ट्रभविश्वजीवभे॥ ४९॥ मनो १४ र्द्विदैवानिलसौम्यशाक्रभे कुपक्षतः २१ शैवकरेष्टि १६ तोजभे॥ युगाश्वितो २४ बुध्न्यभतोययाम्यभे खचंद्रतो १० मित्रभवासवश्रुतौ॥५०॥ मूलेऽगबाणा ५६ द्विषनाडिकाः कृता वर्ज्याः शुभेऽथो विषनाडिका ध्रुवाः॥ निघ्ना भभोगेन खतर्क ६० भाजिताः स्फुटा भवेयुर्विषनाडिकास्तथा॥ ५१॥

खरामेति। मनोरिति। मूले इति॥ रेवतीपुनर्वसुकृत्तिकामघानक्षत्रेषु खरामतस्त्रिंशद्घटिकोत्तरं कृताश्चतस्रो घटिका विषनाडिकाः शुभकार्ये वर्ज्याः स्युरिति तृतीयश्लोकेनान्वयः। एवं सर्वत्र व्याख्येयम्। के रोहिण्याम् अजभे पूर्वाभाद्रपदायाम्। तदेवं षष्टिघटिकात्मके नक्षत्रभोगे ध्रुवका उक्ताः। न्यूनाधिकत्वे स्पष्टीकरणमाह। अथो इति। विषनाडिका ध्रुवाः खरामत इत्येवमादयः इष्टनक्षत्रभोगेन निघ्नाः खतर्कैः षष्ट्या भाजिताः तथा विषनाडिका अपि भोगेन निघ्नाः षष्ट्या भाजिताः लब्धाः स्पष्टा भवेयुरित्यर्थः। परिहारमाह गुरुः। "चंद्रो विषघटीदोषं हंति केंद्रत्रिकोणगः। लग्नं विना शुभैर्दृष्टः केंद्रे वा लग्नपस्तथा॥" इति। "विषनाड्युत्थितं दोषं हंति सौम्यर्क्षगः शशी। मित्रदृष्टोऽथवा स्वीयवर्गस्थो लग्नपोऽपि वा॥" इति। दैवज्ञमनोहरे तिथिवारविषघटिका उक्ताः।

" तिथीषु नागाद्रिगिरीषु वारिधिर्गजाद्रिदिक्पावकदिग्विभाकराः ।
मुनीभसंख्याः प्रथमात्तिथेः क्रमात्परं विषं स्याद्घटिकाचतुष्टयम् ॥
१५ । ५ । ८ । ७ । ७ । ५ । ४ । ८ । ७ । १० । ३ । १० ।
१२ । ७ । ८ । नखाद्वयं द्वादशदिक् च शैला बाणाश्च तत्त्वानि
यथाक्रमेण । सूर्यादिवारेषु परं चतस्रो नाड्यो विषं स्यात्खलु
वर्जनीयम् ॥ २० । २ । १२ । १० । ७ । ५ । २५ । " ॥ ४९ ॥
॥ ५० ॥ ५१ ॥

अथ दुर्मुहूर्तदोषं विवक्षुरादौ दिवामुहूर्त्तान्मालिनीछंदसाह–

**गिरिशभुजगमित्राः पित्र्यवस्वंबुविश्वेऽभिजिदथ
च विधातापींद्रइंद्रानलौ च ॥ निर्ऋतिरुदकनाथोऽ-
प्यर्यमाथो भगः स्युः क्रमश इह मुहूर्ता वासरे
बाणचंद्राः ॥ ५२ ॥**

गिरिशेति ॥ अथ बाणचंद्रा इत्युक्तेर्दुर्मुहूर्तस्य पार्थक्येन लक्षणं
नोक्तम् । इंद्रानलौ इंद्राग्नी एते वासरे पंचदश मुहूर्त्ताः स्युः ॥५२॥

रात्रिमुहूर्त्तानुष्टुभाह––

**शिवोजपादादष्टौ स्युर्भेशा अदितिजीवकौ ॥
विष्णवर्कत्वाष्ट्रमरुतो मुहूर्त्ता निशि कीर्तिताः ॥ ५३ ॥**

शिव इति ॥ प्रथममुहूर्तस्वामी शिवः एवमजपादादष्टौ भेशाः
नक्षत्रस्वामिनो मुहूर्त्तेशाः स्युः । यथा अजपादः अहिर्बुध्न्यः पूषा
अश्विनौ यमः अग्निः ब्रह्मा सोम इत्यष्टौ । ततो दशममुहूर्त्तेऽदितिः
जीवको गुरुः विष्णवर्कत्वाष्ट्रमरुतः प्रसिद्धाः एते सर्वे निशि मुहूर्त्ताः
प्रकीर्तिताः । " अह्नः पंचदशो भागो मुहूर्त्तोऽथ तथा निशि । " इति
कश्यपोक्तेः ॥ ५३ ॥

अथ दुर्मुहूर्त्तान्भुजंगप्रयातेनाह––

रवावर्यमा ब्रह्म रक्षश्च सोमे कुजे वह्निपित्र्ये बुधे

चाभिजित्स्यात् ॥ गुरौ तोयरक्षो भृगौ ब्राह्मपित्र्ये शनावीशसार्पौ मुहूर्तौ निषिद्धाः ॥ ५४ ॥

रवावर्यमेति ॥ रवौ अर्यमा मुहूर्तो निषिद्धः । एवं सोमे ब्रह्मरक्षः द्वंद्वैकत्वम् । ब्रह्मरक्षःस्वामिकौ मुहूर्तौ निषिद्धौ । अन्यत्स्पष्टम् ॥ ५४ ॥

अथ वेधं विवक्षुर्विहितनक्षत्रादिकमभिजिन्मानं च प्रहर्षिण्याह—

निर्वेधैः शशिकरमूलमैत्रपित्र्यब्राह्मांत्योत्तरपवनैः शुभो विवाहः ॥ रिक्तामारहिततिथौ शुभेऽह्नि वैश्वप्रांत्यांघ्रिः श्रुतितिथिभागतोऽभिजित्स्यात् ५५

निर्वेधैरिति ॥ वेधरहितैर्मृगादिनक्षत्रैर्विवाहः शुभः । रिक्तेति । रिक्तामा ४ । ९ । १४ । ३० आभिर्वर्जिततिथिषु शुभेऽह्नि शुभग्रहवारे विवाहः शुभः । अभिजिल्लक्षणमाह । अथ वैश्वेति । वैश्वमुत्तराषाढा तस्य प्रांत्यांशश्चतुर्थचरणः श्रुतेः श्रवणस्य तिथिभागः पंचदशांशो मिलित्वाभिजिद्भोगः स्यात् ॥ ५५ ॥

अथ वेधदोषं पंचशलाकाचक्रोद्धारनिरपेक्षं स्पष्टं शार्दूलविक्रीडितेनाह—

वेधोऽन्योन्यमसौ विरिंच्यभिजितोर्याम्यानुराधर्क्षयोर्विश्वेंद्वोर्हरिपित्र्ययोर्ग्रहकृतो हस्तोत्तराभाद्रयोः ॥ स्वातीवारुणयोर्भवेन्निरृतिभादित्योस्तथोफांत्ययोः खेटे तत्र गते तुरीयचरणाद्योर्वा तृतीयद्वयोः ॥ ५६ ॥

वेधोऽन्योन्यमिति ॥ विरिंच्यभिजितोः रोहिण्यभिजितोर्ग्रहकृतो वेधोऽन्योन्यं परस्परं भवेत् । रोहिणीस्थे ग्रहेऽभिजिद्विद्धः । अभिजित्स्थे रोहिणी विद्धा । एवं सर्वत्र व्याख्येयम् । चरणवेधमाह । खेट इति । तत्र तस्मिन्नक्षत्रे विद्यमाने ग्रहे सति यदि चतुर्थपादेऽस्ति तदा परनक्षत्रस्य प्रथमपादस्य वेधः यदि तृतीयपादे तदा

द्वितीयचरणस्य वेधः एवं यदा द्वितीयपादे तदा तृतीयपादस्य वेधः । यदि प्रथमपादे तदा चतुर्थपादस्य वेध इत्यर्थः । अयं चरणवेधः सौम्यग्रहपर एव । नारदः । " पादमेवं शुभैर्विद्धमशुभैर्नैव कृत्स्नतः । " इति । " क्रूरविद्धं युतं धिष्ण्यं क्रूराक्रांतं च कृत्स्नभम् । मणिहेममयं हर्म्यं भूताक्रांतमिव त्यजेत् ॥ " इति । श्रीपतिः । " वधूप्रवेशने दाने वरणे पाणिपीडने । वेधः पंचशलाकाख्योऽन्यत्र सप्तशलाककः ॥ " इति । ज्योतिर्निबंधे गर्गः । " मघायाः प्रथमे पादे मूलस्य प्रथमे तथा । रेवत्याश्च चतुर्थेऽशे विवाहः प्राणनाशनः ॥ " इति तद्गंडांतांतरं ज्ञेयम् ॥ ५६ ॥

अथ विवाहादन्यत्र यज्ञोपवीतादौ कैश्चिद्विवाहेऽपि सप्तशलाकाचक्रवेधो वर्ज्य उक्तस्तदर्थं चक्रन्यासं विनैव सप्तशलाकावेधं शार्दूलविक्रीडितेनाह--

शाक्रेज्ये शतभानिले जलशिवे पौष्णार्यमर्क्षे वसु-
द्वीशे वैश्वसुधांशुभे हयभगे सार्पानुराधे मिथः ॥
हस्तोपांतिमभे विधातृविधिभे मूलादिती त्वाष्ट्रभा-
जांघ्रीयाम्यमघे कृशानुहरिभे विद्धे कुभृद्रेखिके ५७॥

शाक्रेज्ये इति ॥ कुभृद्रेखिके सप्तशलाकाचक्रे शाक्रे ज्येष्ठापुष्यनक्षत्रे मिथः परस्परं क्रूराधिष्ठितत्वेन विद्धे ज्ञेये । एवं जलशिवे पूर्वाषाढार्द्रे इत्यादि व्याख्येयम् । दीपिकायाम् । " यस्याः शशी सप्तशलाकचक्रे पापैरपापैरथवा विवाहे । उद्वाहवस्त्रेण सुसंवृतांगी स्मशानभूमिं रुदती प्रयाति ॥ " इति ॥ ५७ ॥

अथ क्रूराक्रांतादिदोषं सापवादमनुष्टुभाऽऽह--

ऋक्षाणि क्रूरविद्धानि क्रूरभुक्तादिकानि च ॥
भुक्त्वा चंद्रेण मुक्तानि शुभार्हाणि प्रचक्षते ॥ ५८ ॥

ऋक्षाणीति ॥ क्रूरग्रहैर्विद्धानि तथा क्रूरैर्मुक्तानि त्यक्तानि । आदिशब्दात्क्रूरयुतानि क्रूरगंतव्यानि चकारात्त्रिविधोत्पातदूषितानि च

नक्षत्राणि तानि यदि चंद्रेण भुक्त्वा मुक्तानि तदा शुभार्हाणि शुभकर्मार्हाणि विवाहादौ योग्यानि बुधाः प्रचक्षते कथयंति ॥ ५८ ॥

अथ लत्तादोषमुपजातिकयाऽऽह--

ज्ञराहुपूर्णेंदुसिताः स्वपृष्ठे भं सप्तगोजातिशरैर्मितं हि ॥ संलत्तयंतेऽर्कशनीज्यभौमाः सूर्याष्टतर्काग्निमितं पुरस्तात् ॥ ५९ ॥

ज्ञराह्विति ॥ गावो नव जातयो द्वाविंशतिः शराः पंच एतैर्मितं भं स्वाक्रांतनक्षत्रात् ज्ञराहुपूर्णेंदुसिताः स्वपृष्ठे संलत्तयंते । यथा बुधः सप्तमं राहुर्नवमं राहोः सदा वक्रगत्वान्नवमगणनाक्रमेणैव कार्या । यथाऽश्विन्या 'राहुराश्लेषां लत्तयतीति । पूर्णेंदुः पूर्णिमांतं चंद्रो द्वाविंशम् । तच्च कृष्णपक्षे पंचम्यादितिथौ संभवति । शुक्रः पंचमं स्वपृष्ठे लत्तयतीत्यर्थः । अर्कशनीज्यभौमाः क्रमेण पुरस्तादग्रे सूर्याष्टतर्काग्निमितं संलत्तयंते । यथा । सूर्यः स्वाक्रांतनक्षत्राद्द्वादशं शनिरष्टमं गुरुः षष्ठं भौमस्तृतीयं नक्षत्रमग्रतो लत्तयंतीत्यर्थः । वराहः । " रविलत्ता वित्तहरी नित्यं कौजी विनिर्दिशेन्मरणम् । चांद्री नाशं कुर्याद्बौधी नाशं वदत्येव ॥ सौरी मरणं कथयति बंधुविनाशं बृहस्पतेर्लत्ता । मरणं लत्ता राहोः कार्यविनाशं भृगोर्वदति ॥ " इति ॥ ५९ ॥

अथ पातदोषं पथ्यार्ययाऽऽह--

हर्षणवैधृतिसाध्यव्यतिपातकगंडशूलयोगानाम् ॥ अंते यन्नक्षत्रं पातेन निपातितं तत्स्यात् ॥ ६० ॥

हर्षणेति ॥ व्यतीपातक इति स्वार्थे कः । हर्षणेत्यादिषड्योगानामंते यच्चंद्रनक्षत्रं भवेत् तत्पातेन चंडीशचंडायुधाख्येन निपातितं स्यात् ॥ ६० ॥

अथ क्रांतिसाम्यापरपर्यायं महापातदोषं शालिन्याऽऽह--

पंचास्याजौ मृगौ तौलिकुंभौ कन्यामीनौ कर्क्य-

ली चापयुग्मे ॥ तत्रान्योन्यं चंद्रभान्वोर्निरुक्तं क्रांतेः साम्यं नो शुभं मंगलेषु ॥ ६१ ॥

पंचास्येति ॥ पंचास्याजौ सिंहमेषौ अन्ये प्रसिद्धाः एषु राशियुग्मेषु पाठक्रमेणव्युत्क्रमेणावस्थितयोश्चंद्रभान्वोः क्रांतिसाम्यं निरुक्तम् । तन्मंगलेषु नो शुभं स्यात् । अनेन क्रांतिसाम्यसंभवमात्रं सूचितम् । तदानयनं सूर्यसिद्धांताद्रामविनोदाद्वा स्पष्टं ज्ञेयम् ॥६१॥

अथ खार्जूरदोषं सुबोधमिंद्रवज्रयाऽऽह—

व्याघातगंडव्यतिपातपूर्वशूलांत्यवज्रे परिघातिगंडे ॥ योगे विरुद्धे त्वभिजित्समेतः खार्जूरमर्काद्विषमे शशी चेत् ॥ ६२ ॥

व्याघातेति ॥ अंत्यो वैधृतिः यस्मिन् दिने व्याघातादिके विरुद्धे दुष्टे योगे सति आर्कादर्कनक्षत्रात् शशी चंद्रोऽभिजित्समेतो विषमे विषमसंख्याके नक्षत्रे स्यात्तदा खार्जूराख्यो दोषः स्यात् । यदा समे स्यात्तदा न दोष इत्यर्थः । " एकार्गलो दृष्टिपातश्चाभिजिद्रहितानि वै । " इति कश्यपेनात्राभिजिद्गणना निषिद्धा । केशवार्कत्रिविक्रमादिभिरंगीकृतेति उभयवचनप्रामाण्याद्विकल्पः ॥६२॥

अथोपग्रहदोषमुपेंद्रवज्रयाऽऽह—

शराष्टदिक्शक्रनगातिधृत्यस्तिथिर्धृतिश्च प्रकृतेश्च पंच ॥ उपग्रहाः सूर्यभतोऽब्जताराः शुभा न देशे कुरुबाह्लिकानाम् ॥ ६३ ॥

शराष्टेति ॥ सूर्यभतः सूर्याक्रांतनक्षत्रादब्जताराश्चंद्रनक्षत्राणि पंचाष्टदशचतुर्दशसप्तैकोनविंशतिपंचदशाष्टादशैकविंशतिद्वाविंशतित्रयोविंशतिचतुर्विंशतिपंचविंशतिसंख्याश्चेत्स्युस्तदा उपग्रहनामका

१ " एकार्गलाख्यो ह्यभिजित्समेतो दोषः शशी चेद्विषमर्क्षगोऽर्कात् । " इत्यपि क्वचित्पाठः ।

दोषाः स्युः। प्रकृतिरेकविंशतिः। एषां देशभेदेन परिहारमाह। शुभा नेति। कुरुदेशे बाह्लीकदेशे शुभा न ॥ ६३ ॥

अथ प्रसंगात्पातोपग्रहलत्तास्वपवादमर्धयामं चानुष्टुभाऽऽह--

पातोपग्रहलत्तासु नेष्टोंऽघ्रिः खेटपत्समः ॥
वारस्त्रिघ्नोऽष्टभिस्तष्टः सैकः स्यादर्धयामकः ॥ ६४ ॥

पातेति ॥ पातश्चंडीशचंडायुधाख्यो दोषः। उपग्रहाः प्रागुक्ताः। लत्ता ज्ञराहुपूर्णेंदुसित इत्यादिनोक्ता। तत्र खेटपत्समः ग्रहचरणतुल्यो नक्षत्रचरणो नेष्टः। अयमर्थः। उपग्रहे पाते रविर्यस्मिश्चरणे स्यात्तत्संख्य एव तस्य चरणो वर्ज्यो नान्यः। लत्तायां तु लत्ताकारी ग्रहो यत्र चरणे स्यात्तत्समसंख्य एव चरणो लक्षितनक्षत्रस्य वर्ज्यो नान्यः। उक्तं च। " उपग्रहेषु लत्तायां तथा चंडायुधाह्वये। ग्रहोऽस्ति यत्प्रमाणांशे विद्धांशस्तत्प्रमाणकः ॥ " इति। अयं परिहारः खार्जूरिकेऽपि द्रष्टव्यः। सूर्यो यस्मिन्पादे भवेत्तत्समसंख्य एव चरण एकरेखावस्थितचंद्रनक्षत्रस्य वर्ज्य इति खार्जूरिकसमांघ्रिभमित्युक्तत्वात्। वार इति। इष्टो वारस्त्रिघ्नः अष्टभिस्तष्टः शेषितो योंऽकः सैकः सोर्धयामो दोषः स्यात्। कश्यपः। " शैलाक्षश्रुतयः (७। ५। ४) सूर्ये चंद्रे षड्वेदपर्वताः (६। ४। ७)। भौमे बाणाग्निनेत्राणि (५। ३। २) सौम्ये वेदाक्षिवायवः (४। २। ५) ॥ गुरुवारेऽग्निचंद्रेभाः (३। १। ८) शुक्रे नेत्राद्रिवह्नयः (२। ७। ३)। शनौ चंद्रभतर्काः (१। ८। ६) स्युः कुलिको यमघंटकः ॥ अर्द्धप्रहरसंज्ञांस्तान्मंगलेषु विवर्जयेत्। निधनं प्रहरार्द्धे तु निःसत्त्वं यमघंटके ॥ कुलिके सर्वनाशः स्याद्रात्रावेते न दोषदाः। " इति ॥ ६४ ॥

अथ कुलिकमनुष्टुभाह--

शक्रार्कदिग्वसुरसाब्ध्यश्विनः कुलिका रवेः ॥
रात्रौ निरेकास्तिथ्यंशाः शनौ चांत्योऽपि निंदिताः ६५

शक्रेति ॥ रविमारभ्य सर्ववारेषु क्रमादुक्तसंख्यास्तिथ्यंशा मुहूर्त्ताः कुलिकाः स्युः । यथा दिने रवौ १४ चंद्रे १२ भौमे १० बुधे ८ गुरौ६ शुक्रे ४ शनौ २ रात्रावेते निरेकाः कार्याः । यथा रवौ १३ चं. ११ भौ. ९ बु. ७ गु. ५ शु. ३ श. १ शनौ तु अंत्योऽपि रात्रेः पंचदशोऽपि मुहूर्त्तः कुलिकः । एते निंदिताः । एतेषामर्धयामादिदोषाणां पुनर्निरूपणं विवाहे अवश्यवर्ज्यत्वार्थं शीघ्रोपस्थित्यर्थं चेति । कुलिकापवादे गुरुः । " वारेशे सवले वापि वलाढ्ये लग्नगे शुभे । कुलिकोदयदोषस्तु विनश्यति न संशयः ॥ वाराधीशे वलोपेते विधौ वा वलसंयुते । अर्धप्रहरसंभूतो दोषो नैवात्र विद्यते ॥ शुभे केंद्रगते चंद्रे शुभांशे वा शुभेक्षिते । लग्नगे सवले वापि कुलिकस्तु विलीयते ॥ अर्धप्रहरपूर्वार्द्धं मध्यं तु यमघंटजम् । वर्जयित्वा च कुलिकस्यांत्यांशं शुभमाचरेत् ॥" इति ॥

अथ दग्धतिथ्याख्यदोषमिंद्रवज्रयाऽऽह—

चापांत्यगे गोघटगे पतंगे कर्काजगे स्त्रीमिथुने स्थिते च ॥ सिंहालिगे नक्रधटे समाः स्युस्तिथ्यो द्वितीयाप्रमुखाश्च दग्धाः ॥ ६६ ॥

चापांत्येति ॥ तत्तद्राशिद्वयस्थिते पतंगे सूर्ये द्वितीयाप्रमुखा उभयपक्षसाधारणाः समाः संख्याकास्तिथ्यो दग्धाः स्युः । यथा धनुर्मीनगते सूर्ये द्वितीया दग्धा । वृषकुंभगेऽर्के चतुर्थी । कर्कमेषगे षष्ठी । कन्यामिथुनगेऽष्टमी । सिंहवृश्चिकगे दशमी । तुलामकरगेऽर्के द्वादशी दग्धेत्यर्थः । " मासदग्धाश्च तिथयो मध्यदेशे विवर्जिताः । " इति परिहारः ॥ ६६ ॥

अथ जामित्रदोषं भ्रमरविलसितेनाह—

लग्नाच्चंद्रान्मदनभवनगे खेटे न स्यादिह परिणयनम् ॥ किंवा बाणाशुगमितलवगे जामित्रं स्यादशुभकरमिदम् ॥ ६७ ॥

लग्नादिति ॥ विवाहलग्नाच्चंद्राद्वा सप्तमभवनगते ग्रहे परिणयनं न स्यात् । अस्यापवादः । किं वेति । ग्रहाधिष्ठितनवांशमारभ्य वाणाशुग (५५) मितलवगे पंचपंचाशन्मितनवांशगे चंद्रे लग्ने वा जामित्रं सूक्ष्मं स्यात् । यथा मेषे पंचमनवांशे भौमोऽस्ति तस्मात्तुलायां पंचमनवांशस्थचंद्रो निषिद्धोऽन्येऽष्टौ नवांशाः शुभाः । एवंविधं सूक्ष्मजामित्रमिदमशुभकरं स्यात् । अस्यापवादो व्यवहारोच्चये । " स्वोच्चेऽथवा स्वभवने स्फुरदंशुजालः सौम्यालये हितगृहे शुभवर्गगो वा । जामित्रकादिपरिसंचितदोषराशिं हत्वा ददाति बहुशः सुखमेव चंद्रः ॥ " इति ॥ ६७ ॥

अथैकार्गलादिदोषाणामपवादभूतं साक्षाद्वसिष्ठवचनमेवेंद्रवज्रयाऽऽह—

एकार्गलोपग्रहपातलत्ताजामित्रकर्तर्युदयास्तदोषाः ॥ नश्यंति चंद्रार्कबलोपपन्ने लग्ने यथार्काभ्युदये तु दोषाः ॥ ६८ ॥

एकार्गलेति ॥ चंद्रार्कबलोपपन्ने चंद्रार्कयोः स्वोच्चमित्रादिराशिस्थितत्वरूपेण बलेन युक्ते लग्ने सति एकार्गलादयो दोषा नश्यंति । यथार्काभ्युदये दोषा रात्रिर्नश्यति ॥ ६८ ॥

अथ केषांचिद्दोषाणां देशविशेषेण परिहारमुपजात्याऽऽह—

उपग्रहर्क्षे कुरुबाह्लिकेषु कलिंगवंगेषु च पातितं भम् ॥ सौराष्ट्रशाल्वेषु च लत्तितं भं त्यजेत्तु विद्धं किल सर्वदेशे ॥ ६९ ॥

उपग्रहर्क्षमिति ॥ स्पष्टार्थम् । अन्यच्च । " लत्ता मालवके देशे पातः कौसलके तथा । एकार्गलं तु काश्मीरे वेधं सर्वत्र वर्जयेत् ॥ युतिदोषो भवेद्गौडे जामित्रस्य च यामुने । वेधदोषस्तु विंध्याख्ये देशे नान्येषु केषु च ॥ " इति ॥ ६९ ॥

अथ दशयोगदोषमुपजात्याह—

शशांकसूर्यर्क्षयुतेर्भशेषे खं भूयुगांगानि दशेशतिथ्यः ॥ नागेंदवोऽर्केंदुमिता नखाश्चेद्भवंति चैते दश योगसंज्ञाः ॥ ७० ॥

शशांकेति ॥ चेद्यदि चंद्रसूर्यनक्षत्रयोर्युतेर्योगात् भैः सप्तविंशत्या भक्ताद्यः शेषस्तस्मिन् शून्यैकचतुःषड्दशैकादशपंचदशाष्टदशैकोनविंशतिर्विंशतिसंख्याके सति एतेऽका दशदशयोगसंज्ञा भवंति । शिष्टानां दशानामंकानामभिहितत्वाद्दशयोग इत्यन्वर्था संज्ञा ॥ ७० ॥

अथ दशयोगफलं तदपवादं च शार्दूलविक्रीडितेनाह—

वाताभ्राग्निमहीपचोरमरणं रुग्वज्रवादाः क्षतिर्योगांके दलिते समे मनुयुतेऽथौजे तु सैकेर्धिते ॥ भं दास्त्रादथ संमितास्तु मनुभी रेखाः क्रमात्संलिखेद्वेधोस्मिन्ग्रहचंद्रयोर्न शुभदः स्यादेकरेखास्थयोः ७१

वाताभ्रेति ॥ शून्ये शेषे वातदोषः स्यात् । एकशेषेऽभ्राच्चतुःशेषेऽग्नेः षट्शेषे महीपात् दशशेषे चोरात् एकादशसु मरणं पंचदशसु रुक् अष्टादशसु वज्रम् एकोनविंशेषु वादः कलिः झक्टक इत्यर्थः । विंशतिशेषे क्षतिर्द्रव्यनाशः । अथापवादः । योगांक इति । खंभूयुगादिरूपे योगांके समे युग्मसंख्याके सति दलिते अर्धीकृते मनुभिश्चतुर्दशभिर्युक्ते योऽकः स्यात् तद्दास्रादश्विनीतो भं नक्षत्रं स्यात् । अथौजे तु सैकेर्धिते योगांके ओजे विषमे सैके अर्धिते अश्विनीतः भं नक्षत्रं स्यात् । यथा समांका दश अर्धिताः (५) मनु (१४) युताः (१९) मूलं नक्षत्रं जातम् । ओजांके यथा । विषमांके (१५) योगः सैकः (१६) अर्धितः (९) पुष्यनक्षत्रं जातम् । अथानंतरं मुनिभिः संमिताश्चतुर्दशरेखास्तिर्यक्क्रमात्संलिखेत्ततः अनेन प्रकारेण यन्नक्षत्रमागतं तत आरभ्य साभि-

जिन्नक्षत्रवृंदमस्मिंश्चक्रे लेख्यम् । तन्नक्षत्रे ग्रहाः स्थाप्याः । दिनन-क्षत्रे चंद्रः स्थाप्यः । तत एकरेखास्थयोः ग्रहचंद्रयोः परस्परावलो-कनरूपो वेधो न शुभदः । उक्तं च ज्योतिःसागरे । " तिथ्यंगवे-दंकदिगूनविंशशून्यं भवाष्टादशविंशसंख्याः । इष्टोडुना सूर्ययुतो-डुना च योगादमी चेद्दश योगदोषाः ॥ मरुन्मेघाग्निभूपालचौरमृ-त्युरुजो शनिः । कलिर्हानिर्दश दोषास्त्याज्याः स्युः सर्वथा बुधैः ॥ योगांके विषमे सैकें समे सवसुलोचने । दलीकृतेऽश्विनीपूर्वं दशयो-गमुदाहृतम् ॥ दशयोगे महाचक्रे प्रमादाद्यदि विध्यते । क्रूरैः सौम्य-ग्रहैर्वापि दंपत्योरेकनाशनम् ॥ " इति । दशयोगापवादांतरमाह भरद्वाजः । " गुरौ लग्नाधिपे शुक्रे सवीर्ये लग्नकेंद्रगे । दश दोषा विनश्यंति यथाग्नौ तूलराशयः ॥ " व्यासः । "गुरुणा भृगुणा वापि संयुतं दृष्टमेव च । दशयोगसमायुक्तमपि लग्नं शुभावहम् ॥ " ॥७१॥

अथ पंचकाख्यं बाणदोषं शालिन्याह—

लग्नेनाढ्या याततिथ्योऽकतष्टाः शेषे नागद्व्यब्धि-तर्केंदुसंख्ये ॥ रोगो वह्नी राजचौरौ च मृत्युर्बाण-श्चायं दाक्षिणात्यप्रसिद्धः ॥ ७२ ॥

लग्नेनेति ॥ शुक्लपक्षादिकास्तिथयो वर्तमानलग्नेनाढ्या युक्ताः अंकैर्नवभिस्तष्टाः शेषे नागसंख्ये अष्टसंख्ये रोगाख्यो बाणः । एवं द्विसंख्ये शेषे वह्न्याख्यः । चतुःसंख्ये राजाख्यः । षट्संख्ये चौराख्यः एकसंख्ये । मृत्युसंज्ञो बाणः । एते बाणाः दाक्षिणात्येषु महाराष्ट्रेषु प्रसिद्धाः ॥ ७२ ॥

अथ व्यासमतेन बाणं सापवादं मालिन्याऽऽह—

रसगुणशशिनागाब्ध्याढ्यसंक्रांतियातांशकमिति रथतष्टांकैर्यदा पंच शेषाः ॥ रुगनलनृपचोरा मृत्युसंज्ञश्च बाणो नवहृतशरशेषे शेषकैक्ये स-शल्यः ॥ ७३ ॥

रसगुणेति ॥ रसगुणशशिनागाब्धिभिराढ्या चासौ संक्रांतियातांशकमितिश्चेति कर्मधारयः । सूर्यभुक्तांशानां मितिः संख्या पंचधा स्थाप्या । कलादिकमुपेक्ष्यम् । सा क्रमेण षट्त्र्येकाष्टचतुर्भिराढ्या संयोज्यांकैर्नवभिस्तष्टा सती यदा पंच शेषा यस्मिन् स्थले पंच शिष्यंते तत्र क्रमेण रुगादिबाणो ज्ञेयः । यथा आदौ पंचशेषे रोगबाणः द्वितीये पंचशेषेऽग्निबाणः । तृतीये राजबाणः । चतुर्थे चौरबाणः । पंचमे मृत्युबाणः । तस्माद्भयं भवतीत्यर्थः । अयं बाणः शल्यरहितः तेन स्वल्पदोषः । तदपवादभूतः सशल्यो बाण उच्यते । नवेति । यानि प्रागागतानि शेषाणि तेषामैक्ये नवहृते पश्चाच्छरशेषे सति सशल्यः शल्यसहितो बाणः स्यात् । पंचव्यतिरिक्ते शेषे शल्यरहितो दुष्ट इत्यर्थः । अन्यैस्तु । " तिथिवारभलग्नांको रसाग्न्यब्जाष्टवेदयुक् । नंदाप्तपंचशेषे रुग्वह्निराड् चोरमृत्युकृत् ॥ " इति ॥ ७३ ॥

अथ समयभेदेन वारभेदेन कर्मभेदेन च त्रिविधं बाणपरिहारं शार्दूलविक्रीडितेनाह---

रात्रौ चोररुजौ दिवा नरपतिर्वह्निः सदा संध्ययो-
र्मृत्युश्चाथ शनौ नृपो विदि मृतिर्भौमेऽग्निचोरौ रवौ ॥
रोगोऽथ व्रतगेहगोपनृपसेवाया न पाणिग्रहे
वर्ज्याश्च क्रमतो बुधै रुगनलक्ष्मापालचोरामृतिः॥७४॥

रात्रौ चोरेति ॥ चौररुजौ बाणौ रात्रौ त्याज्यौ । दिवा नरपतिः राजबाणस्त्याज्यः । वह्निबाणः सदा दिवारात्रौ त्याज्यः । संध्ययोः सायंप्रातःसंध्ययोर्मृत्युबाणस्त्याज्यः । ज्योतिःप्रकाशे । "रोगं चौरं त्यजेद्रात्रौ दिवा राजन्यपंचकम् । संध्ययोर्मृत्युदं त्याज्यं सर्वदा वह्निपंचकम् ॥ " इति । अथ वारभेदेन परिहारः । अथेति । शनिवारे नृपबाणः । विदि बधवारे मृतिबाणः । भौमेऽग्निचौरौ बाणौ । रवौ रोगबाणस्त्याज्यः । उक्तं च । " रवौ रोगं कुजे वह्निं शनौ च

नृपपंचकम् । वर्ज्यं पुनः कुजे चौरं बुधवारे च मृत्युदम् ॥ " अथ कार्यभेदेन परिहारः । अथेति । क्रमत एषु शुभकर्मसु एते बाणा वर्ज्याः । यथा व्रते यज्ञोपवीते रुक् । गृहस्याच्छादनेऽग्निः । नृपसेवायां राजबाणः । याने चौरः । पाणिग्रहे मृतिबाणो वर्ज्यः । उक्तं च । " नृपाख्यं नृपसेवायां गृहगोपेऽग्निपंचकम् । याने चौरं व्रते रोगं त्यजेन्मृत्युं करग्रहे ॥ " इति ॥ ७४ ॥

अथ ग्रहदृष्टिमुपजातिकयाऽऽह--

त्र्यांशं त्रिकोणं चतुरस्रमस्तं पश्यंति खेटाश्चरणाभिवृद्ध्या ॥ मंदो गुरुर्भूमिसुतः परे च क्रमेण संपूर्णदृशो भवंति ॥ ७५ ॥

त्र्यांशमिति ॥ ये खेटाः यस्मिन् स्थाने स्थिताः तस्मात्कथ्यमानानि स्थानानि चरणाभिवृद्ध्या पश्यंति । तद्यथा त्र्यांशं तृतीयं दशमं च एकचरणदृष्ट्या पश्यति । अनेन तत्तद्ग्रहोद्भवफलं चरणाभिवृद्ध्यैव भवतीति सूचितम् । मंद इति । मंदः शनैश्चरः स्वस्थानात् त्र्यांशं संपूर्णदृक् चतुश्चरणदृष्टिः । एवं गुरुस्त्रिकोणं पूर्णदृक् । भूमिसुतश्चतुरस्रं पूर्णदृक् । परेऽर्कचंद्रबुधशुक्राः सप्तमं पूर्णदृशः ॥ ७५ ॥

अथोदयास्तशुद्धिं शिखरिणीभुजंगप्रयाताभ्यामाह--

यदा लग्नांशेशो लवमथ तनुं पश्यति युतो भवेद्वायं वोढुः शुभफलमनल्पं रचयति ॥ लवद्यूनस्वामी लवमदनभं लग्नमदनं प्रपश्येद्वा वध्वाः शुभमितरथा ज्ञेयमशुभम् ॥ ७६ ॥ लवेशो लवं लग्नपो लग्नगेहं प्रपश्येन्मिथो वा शुभं स्याद्वरस्य ॥ लवद्यूनपोंशद्युनं लग्नपोऽस्तं मिथो वेक्षते स्याच्छुभं कन्यकायाः ॥ ७७ ॥

यदा लग्नांशेश इति । लवेशो लवमिति ॥ लग्नेशः लग्नस्वामी अंशेशो लग्ननवांशस्वामी लवं नवांशं पश्यति । वाऽथवा नवांशेन सह युतो भवेत्तदा वोढुर्वरस्यानल्पं शुभफलं रचयति । यथा मेषलग्ने मिथुनांशस्तदीशो बुधस्तुलायां मिथुनं पश्यति तत्र तिष्ठति वा । अयमुदयशुद्धेः प्रथमः प्रकारः । तदभावे तु लग्नांशेशस्तनुं लग्नं पश्यति । लग्नेन सह युतो भवेत्तदापि वोढुः शुभफलमनल्पं स्यात् । यथा मेषलग्ने एव मिथुननवांशस्वामी बुधो मकरे नवांशं न पश्यति । किंतु लग्नं पश्यति । अथवा मेष एव तिष्ठति । अयमुदयशुद्धेर्द्वितीयः प्रकारः । लवद्यूनस्वामी लग्नान्नवांशात् द्यूनं सप्तमनवांशस्तत्स्वामी लवमदनभं लवान्मदनभं सप्तमनवांशं पश्यति तेन सह युतो वा भवेत् तदा वध्वाः अनल्पं बहु शुभं रचयति । यथा मिथुननवांशात्सप्तमो धनुरंशस्तदीशो गुरुर्मेषे धनुः पश्यति तत्र तिष्ठति वा । अयमस्तशुद्धेः प्रथमः प्रकारः । तदा लाभे तु लवद्यूनस्वामी लग्नान्मदनं सप्तमं भवनं पश्यति युतो वा सप्तमभवनेन तदा वध्वाः शुभम् । यथा गुरुः कर्के स्वनवांशं न पश्यति किंतु सप्तमभवनं तुलां पश्यति । अथवा तुलायामेवास्ति तदा वध्वाः शुभम् । अयमस्तशुद्धेर्द्वितीयः प्रकारः । इन्यथेति । यदा लग्नांशेशो लवं तनुं वा न पश्यति तत्र युतो वा न स्यात्तदा वरस्याशुभम् । एवं लवद्यनस्वामी नवांशं सप्तमं वा न पश्यति तत्र युतो वा न स्यात्तदा कन्याया अशुभम् । काश्यपः । " स्वस्वेशे नोदयास्तांशौ वीक्षितौ वाथ संयुतौ । लग्नं वास्तगृहं तत्तदंशेशेनेक्षितं युतम् ॥ " इति । लवेश इति । नवांशस्वामी नवांशं प्रपश्येत् लग्नस्वामी लग्नं प्रपश्येत्तदा वरस्य शुभम् । एवं लवद्यूनपो नवांशात्सप्तमनवांशस्वामी अंशद्यूनमंशसप्तमराशिं पश्येत् लग्नपो लग्नस्वामी अस्तं लग्नात्सप्तमभवनं पश्येत् तदा कन्यायाः शुभं स्यात् । वा मिथः अंशसप्तमाधीशो लग्नसप्तममीक्षते लग्नात्सप्तमाधीशश्चांशसप्तममीक्षते तदापि कन्यायाः शुभं स्यात् । अत्राप्यन्यथात्वे दंपत्योरशुभमित्यर्थः । नारदः । " लग्ननवांशकौ स्वस्वपतिना वीक्षितौ युतौ । न चेद्वा-

न्योन्यपतिना शुभमित्रेण वा तथा ॥ वरस्य मृत्युः स्यात्ताभ्यां सप्तसप्तोदयांशकौ । एवं तौ वीक्षितयुतौ मृत्युर्वध्वाः करग्रहः ॥ ” इति ॥ ७६ ॥ ७७ ॥

अथ पूर्वोक्तप्रकारेणोदयास्तशुद्धेरभावे तृतीयः प्रकार उच्यते मालिनीछंदसा—

लवपतिशुभमित्रं वीक्षतेऽशं तनुं वा परिणयनकरस्य स्याच्छुभं शास्त्रदृष्टम् ॥ मदनलवपमित्रं सौम्यमंशं द्युनं वा तनुमदनगृहं चेद्वीक्षते शर्म वध्वाः ॥ ७८ ॥

लवपतीति ॥ शुभं च तन्मित्रं चेति कर्मधारयः । लवपतेर्लग्ननवांशेशस्य शुभग्रहः चंद्रबुधगुरुशुक्राणामन्यतमश्चेन्मित्रं स्यात्स चेदंशं नवांशं तनुं वा वीक्षते तदा परिणयनकरस्य वरस्य शास्त्रदृष्टं पुत्रादिप्राप्तिरूपं शुभं फलं स्यात् । एवं मदनलवपस्यास्तांशेशस्य मित्रं सौम्यं तच्चांशद्यूनमंशाल्लग्ननवांशात् द्यूनं सप्तमनवांशं चेद्वीक्षते अथवा तनुमदनगृहं लग्नात्सप्तमभवनं चेद्वीक्षते तदा वध्वाः शर्म कल्याणं कुर्यात् । यद्युभयत्रापि नवांशस्वामिनो मित्रं पापग्रहश्चेत्तस्य दृष्टिः शुभैवेति फलितोऽर्थः । वराहः । “ शुद्धस्त्विह स्यान्नयदोदयांशो लग्नेन वास्तांश उपैति शुद्धिम् । तदा सुहृत्सौम्यनिरीक्षितो यः शुभाय स स्यात्प्रवदंति संतः ॥ ” इति । केचिद्विवाहे वज्रयोगं निषिद्धमाहुः । तल्लक्षणम् । “ तिथिवारं च नक्षत्रं नवभिश्च समन्वितम् । सप्तभिस्तु हरेद्भागं शेषांके फलमादिशेत् ॥ त्रिशेषे तु जलं विंद्यात्पंचशेषे प्रभंजनः । सप्तशेषे वज्रपातो ज्ञेयं वज्रस्य लक्षणम् ॥ ” इति ॥ ७८ ॥

अथार्कसंक्रमणदोषं मंजुभाषिण्याऽऽह—

विषुवायनेषु परपूर्वमध्यमान्दिवसांस्त्यजेदितरसंक्रमेषु हि ॥ घटिकास्तु षोडश शुभक्रियाविधौ परतोऽपि पूर्वमपि संत्यजेद्बुधः ॥ ७९ ॥

विषुवायनेष्विति ॥ विषुवं तुलामेषसंक्राती चतसृषु संक्रांतिषु परपूर्वमध्यमान् गतागामिवर्तमानान् दिवसान् बुधः. शुभक्रिया-विधौ विवाहादौ त्यजेत् । इतरसंक्रांतिषु संक्रमणकालात्परतोऽग्रे पूर्वं प्रागपि षोडश घटिका मिलित्वा द्वात्रिंशद्घटिकास्त्यजेत् । गुरुः । " अयने विषुवे पूर्वं परं मध्यं दिनं त्यजेत् । अन्यसंक्रमणे पूर्वाः पराः षोडश नाडिकाः ॥ " इति ॥ ७९ ॥

अथ प्रसंगात्सकलग्रहाणां संक्रांतिघटीरनुष्टुभाऽऽह—

देवद्व्यंकर्तवोऽष्टाष्टौ नाड्योऽकाः खनृपाः क्रमात् ॥
वर्ज्याः संक्रमणेऽर्कादेः प्रायोऽर्कस्यातिनिंदिताः॥८०॥

देवेति ॥ यथा क्रमेण सूर्यादेः संक्रमणे एता घटिका वर्ज्याः । यथा रवेः प्राक्पश्चात्त्रयस्त्रिंशद्घटिकास्त्याज्याः चंद्रस्य द्वे भौमस्य नव बुधस्य षट् गुरोरष्टाष्टौ अष्टाशीतिः शुक्रस्यांका नव शनेः खनृपाः षष्ट्यधिकं शतमिति ॥ ८० ॥

अथ पंग्वंधबधिराख्यान् लग्नदोषानुपजातिकयाऽऽह--

घस्रे तुलाली बधिरौ मृगाश्वौ रात्रौ च सिंहाजवृषा दिवांधाः ॥ कन्यानृयुक्कर्कटका निशांधा दिने घटोऽत्यो निशि पंगुसंज्ञः ॥ ८१ ॥

घस्र इति ॥ घस्रे दिवसे तुलावृश्चिकौ बधिरसंज्ञकौ । रात्रौ मकरधनुषौ बधिरसंज्ञौ । शेषं स्पष्टम् । वसिष्ठः । " तुला च वृश्चिकश्चैव दिवसे बधिरौ तथा । धनुश्च मकरश्चैव बधिरौ निशि कीर्तितौ ॥ मेषो वृषो मृगेंद्रश्च दिवसांधाः प्रकीर्तिताः । नृयुक्कर्कटकन्याश्च रात्र्यंधाः प्रकीर्तिताः ॥ कुंभमीनौ च पंगू द्वौ दिवारात्रौ यथाक्रमम् । " इति । अनेन तस्मिन्कालेंऽधादिलग्नानि वर्ज्यानीत्यर्थः ॥ ८१ ॥

अथ केषांचिन्मतमाह—

बधिरा धन्वितुलालयोऽपराह्णे मिथुनं कर्कटको-

ऽगना निशांधाः ॥ दिवसांधा हरिगोक्रियास्तु कुब्जां मृगकुंभांतिमभानि संज्ञयोर्हि ॥ ८२ ॥

बधिरा धन्वीति ॥ स्पष्टार्थम् ॥ ८२ ॥

अथैषां प्रयोजनं सापवादं प्रहर्षिण्याऽऽह—

दारिद्र्यं बधिरतनौ दिवांधलग्ने वैधव्यं शिशुमरणं निशांधलग्ने ॥ पंग्वंगे निखिलधनानि नाशमीयुः सर्वत्राधिपगुरुदृष्टिभिर्न दोषः ॥ ८३ ॥

दारिद्र्यमिति ॥ पंग्वंगे पंगुलग्ने । अन्यत्स्पष्टम् ॥ ८३ ॥

अथ विहितनवांशांश्चित्रपदाच्छंदसाऽऽह—

कार्मुकतौलिककन्या युग्मलवे झषगे वा ॥ यर्हि भवेदुपयामस्तर्हि सती खलु कन्या ॥ ८४ ॥

कार्मुकेति ॥ युग्मं मिथुनम् एषां नवांशाः झषगे वा मीननवांशे विकल्पेन । वाशब्द एकीयमतसूचनार्थः । एष्वंशेषु यर्हि उपयामो विवाहो भवेत्तर्हि कन्या सती पतिव्रता भवेत् ॥ ८४ ॥

अथ विहितनवांशे क्वचिन्निषेधं श्रीछंदसाह—

अंत्यनवांशे न च परिणेया काचन वर्गोत्तममिह हित्वा ॥ नो चरलग्ने चरलवयोगं तौलिमृगस्थे शशभृति कुर्यात् ॥ ८५ ॥

अंत्यनवांशे इति ॥ विहितनवांशेष्वपि यथा मेषलग्ने धनुर्नवमांशोंऽतिम इत्येवंविधे विषये काचन कन्या न परिणेया न विवाह्या । परंतु वर्गोत्तममंतिमनवांशं हित्वा । तत्र विवाह उचित एव । यथा मिथुनलग्ने मिथुननवांशे " अंत्यांशका अपि श्रेष्ठा यदि वर्गोत्तमाह्वयाः । " इति कश्यपोक्तेः । नो चरलग्न इति । तौलिमृगस्थे तुलामकरस्थे चंद्रे चरलग्ने विहितचरलवयोगं नो कुर्यात् । यथा मेषलग्ने तुलांश इति ॥ ८५ ॥

अथ लग्नभंगमुपजात्याऽऽह——

व्यये शनिः खेऽवनिजस्तृतीये भृगुस्तनौ चंद्रखला न शस्ताः ॥ लग्नेट् कविग्लौश्च रिपौ मृतौ ग्लौ-र्लग्नेट् शुभाराश्च मदे च सर्वे ॥ ८६ ॥

व्यये शनिरिति ॥ द्वादशे शनिर्नो शस्तः । खे दशमेऽवनिजो भौमो न शस्तः । तृतीये शुक्रो न शस्तः । लग्ने चंद्रखलाः चंद्रः पापग्रहाश्च न शस्ताः । लग्नेट् लग्नस्वामी कविः शुक्रो ग्लौश्चंद्रश्च रिपौ षष्ठे न शस्ताः । ग्लौश्चंद्रः लग्नेट् लग्नस्वामी शुभा बुधगुरुशुक्रा आरो भौमश्च एते मृतावष्टमे न शस्ताः । मदे सप्तमे सर्वे ग्रहा न शस्ताः ॥ ८६ ॥

अथ रेखाप्रदान्वसंततिलकयाऽऽह——

त्र्यायाष्टषट्सु रविकेतुतमोर्कपुत्रास्त्र्यायारिगः क्षितिसुतो द्विगुणायगोऽब्जः॥सप्तव्ययाष्टरहितौ ज्ञगुरू सितोऽष्टत्रिद्यूनषड्व्ययगृहान्परिहृत्य शस्तः ॥८७॥

त्र्यायेति ॥ स्पष्टार्थम् ॥ ८७ ॥

कर्तर्यादिमहादोषाणामपवादं शार्दूलविक्रीडितेनाह——

पापौ कर्तरिकारकौ रिपुगृहे नीचास्तगौ कर्तरी-दोषो नैव सितेऽरिनीचगृहगे तत्षष्ठदोषोऽपि न ॥ भौमेऽस्ते रिपुनीचगे न हि भवेद्भौमोऽष्टमो दोष-कृन्नीचे नीचनवांशके शशिनि रिःफाष्टारिदोषोऽपि न ॥ ८८ ॥

पापौ कर्त्तरिकारकाविति ॥ कर्त्तरिकारकौ क्रूरौ ग्रहौ रिपुगृहे शत्रुगृहे स्थितौ नीचे नीचराशिगौ अस्तगौ अस्तंगतौ वा तदा

१ नीचे इत्यपि पाठः ।

कर्तरीदोषो नैव स्यात् । कश्यपः । "पापयोः कर्तरीकर्त्रोः शत्रुनीचगृहस्थयोः । यदा चास्तगयोर्वापि कर्तरी नैव दोषदा ॥" इति । अथ सिते शुक्रे अरिनीचगृहगे शत्रुगृहगे स्वनीचगृहगे वा सति तत्षष्ठदोषोऽपि न स्यात् । कश्यपः । " नीचराशिगते शुक्रे शत्रुक्षेत्रगतेऽपि वा । भृगुषट्कास्थितो दोषो नास्ति तत्र न संशयः ॥ " इति । भौमेऽस्ते अस्तंगते रिपुनीचगे शत्रुगृहे नीचगृहे वाऽष्टमो भौमो दोषकृन्न स्यात् । कश्यपः । " अस्तगे नीचगे भौमे शत्रुक्षेत्रगतेऽपि वा । कुजाष्टमोद्भवो दोषो न किंचिदपि विद्यते ॥ " अथ शशिनि चंद्रे नीचे नवांशके वा सति द्वादशाष्टमषष्ठस्थानस्थितचंद्रदोषोऽपि न स्यात् । " नीचराशिगते चंद्रे नीचांशकगतेऽपि वा । चंद्रे षष्ठाष्टरिःफस्थे दोषो नास्ति न संशयः ॥ " इति कश्यपोक्तेः ॥ ८८ ॥

अथाब्ददोषाद्यनेकदोषापवादं वसंततिलकयाऽऽह—

अब्दायनर्तुतिथिमासभपक्षदग्धतिथ्यंधकाणबधिरांगमुखाश्च दोषाः ॥ नश्यंति विद्गुरुसितेष्विह केंद्रकोणे तद्वच्च पापविधुयुक्तनवांशदोषः ॥ ८९ ॥

अब्दायनेति ॥ विद्गुरुसितेषु केंद्रकोणे सप्तमस्थानरहितेषु सत्सु एते दोषा नश्यंति । कश्यपः । " अब्दायनर्तुमासोत्थाः पक्षतिथ्यृक्षसंभवाः । ते सर्वे नाशमायांति केंद्रसंस्थे शुभग्रहे ॥ काणांधबधिरोद्भूता दग्धलग्नतिथेर्भवाः । ते दोषा नाशमायांति केंद्रसंस्थे शुभग्रहे ॥ अकालजाश्च नीहारविद्युत्पांस्वभ्रसंभवाः । परिवेषप्रतीसूर्यशक्रचापध्वजादयः ॥ दोषप्रदा मंगलेषु कालजाश्चेन्न[1] दोषदाः । गुरुरेकोऽपि केंद्रस्थः शुक्रो वा यदि वा बुधः ॥ हरेः स्मृतिर्यथा हंति तद्वद्दोषांस्त्रिकोणगः । लत्तोपग्रहचंडीशचंद्रजामित्रसंभवान् ॥ तत्केंद्रगो गुरुर्हंति सुपर्णः पन्नगानिव । तद्वच्चेति । " तथा यदि

---

१ न कालजानित्यपि पाठः ।

पापाः क्रूरा विधुश्चंद्रस्तैर्युक्तो यो नवांशस्तद्दोषोऽपि नश्यति । उक्तं च । " सक्रूरराशेरशुभो नवांशः प्रोक्तः स पापोऽपि विलग्नसंस्थः । त्रिकोणकेंद्रेषु गुरुः सितो वा यदा तदासावशुभोऽभिशस्तः ॥ " इति ॥ ८९ ॥

अथान्यान्परिहाराञ्छालिन्याऽऽह—

केंद्रे कोणे जीव आये रवौ वा लग्ने चंद्रे वापि वर्गोत्तमे वा ॥ सर्वे दोषा नाशमायांति चंद्रे लाभे तद्वद्दुर्मुहूर्तांशदोषाः ॥ ९० ॥

केंद्रे कोण इति ॥ केंद्रसप्तमरहिते १ । ४ । १० कोणे नवपंचमे वा तत्र गुरौ सति सर्वे दोषा नाशमायांति । कश्यपः । " काव्ये गुरौ वा सौम्ये वा यदा केंद्रत्रिकोणगे । नाशयंत्यखिलान्दोषान्पापानीव हरिस्मृतेः ॥ " अथवा आये एकादशे रवौ सति सर्वे दोषा नाशमायांति । वा लग्ने चंद्रे वा वर्गोत्तमे राशिनवांशयुक्ते सति । यथा मिथुने मिथुनो नवांशस्तदापि दोषनाशः । द्वितीयवाशब्दस्यानुक्तसमुच्चयार्थत्वात् । चंद्रो लग्नादुपचये सर्वदोषविनाशकः । उक्तं च । " यत्रैकादशगः सूर्यो दोषा नाशं ययुस्तदा । स्मरणादेव रुद्रस्य पापं जन्मशतोद्भवम् ॥ वर्गोत्तमगते लग्ने सर्वे दोषा लयं ययुः । चंद्रो वाप्यथवा येऽपि ग्रीष्मे कुसरितो यथा ॥" चंद्रेति । एकादशे चंद्रे सति दुर्मुहूर्तांशदोषाः । दुर्मुहूर्ता रत्रावर्यमेत्यादयः । अंशदोषाः पापग्रहनवांशाख्याः ते सर्वे तद्वन्नाशमायांति । कश्यपः । " मुहूर्तलग्नषड्वर्गकुनवांशग्रहोद्भवाः । ये दोषास्तान्निहंत्येव यत्रैकादशगः शशी ॥ " ज्योतिर्निबंधे । "नक्षत्रदोषं कुनवांशदोषं गंडांतदोषं च मुहूर्त्तदोषम् । विरुद्धपंचांगविरुद्धदोषं निशाकरो लाभगतो निहंति ॥ " ॥ ९० ॥

अथ सामान्यतो दोषसमूहपरिहारं शिखरिण्याऽऽह—

त्रिकोणे केंद्रे वा मदनरहिते दोषशतकं हरेत्सौम्यः

१ चन्द्र इत्यपि पाठः ।

शुक्रो द्विगुणमपि लक्षं सुरगुरुः ॥ भवेदाये केंद्रे-ऽगप उत लवेशो यदि तदा समूहं दोषाणां दहन इव तूलं शमयति ॥ ९१ ॥

त्रिकोणे इति ॥ त्रिकोणे सप्तमरहिते केंद्रे वा यदि सौम्यो बुधस्तिष्ठेत्तदा दोषशतकं हरेत् । उक्तस्थानस्थितः शुक्रोऽपि द्विगुणं दोषशतकं दोषद्विशतिं हरेत् । तथोक्तस्थानस्थितो गुरुरपि लक्षदोषान्हरेत् । भवेदिति । अंगपो लग्नस्वामी । उत वार्थे । लवेशो लग्नगतनवांशनाथो वा आये केंद्रे यदि भवेत्तदा दोषाणां समूहं नाशयति । यथा दहनोऽग्निस्तूलं कार्पासमिव । " लग्नेट् लग्नांशनाथो वा आयगः केंद्रगोऽपि वा । राशिं निहंति दोषाणामिंधनानीव पावकः ॥ " इति ॥ ९१ ॥

अथ लग्नविंशोपकाननुष्टुभाऽऽह--

द्वौ द्वौ ज्ञभृग्वोः पंचेंदौ रवौ सार्द्धत्रयो गुरौ ॥
रामा मंदागुकेत्वारे सार्द्धैकैकं विंशोपकाः ॥ ९२ ॥

द्वाविति ॥ ज्ञभृग्वो रेखाप्रदयोः सतोर्द्वौ द्वौ विंशोपकौ । एवंविधे चंद्रे पंच । सूर्ये सार्द्धास्त्रयः (३ । ३०) गुरौ रामास्त्रयः। मंदः शनिः अगू राहुः केतुः आरो भौमः एषु प्रत्येकं सार्द्धमेकैकं (१ । ३०) विंशोपका ज्ञेयाः ॥ ९२ ॥

ग्रहवशेन श्वशुरादिविभागं सप्रयोजनमुपजात्याह--

श्वश्रूः सितोऽर्कः श्वशुरस्तनुस्तनुर्जामित्रपः स्याद्दयितो मनः शशी ॥ एतद्बलं संप्रति भाव्यतांत्रिकस्तेषां सुखं संप्रवदेद्विवाहतः ॥ ९३ ॥

श्वश्रूरिति ॥ सितः कन्यायाः श्वश्रूः सूर्यः श्वशुरः तनुर्लग्नं तनुः शरीरं स्यात् जामित्रपः सप्तमाधीशो दयितो भर्ता मनः चंद्रः एतेषां शुक्रादीनां बलं विचार्य तांत्रिकः सिद्धांतवेत्ता विवाहतो विवाहानंतरं श्वशुरादीनां सुखं स्यादिति प्रवदेत् । कैश्चिद्विशेषांतरमप्यु-

क्तम् । " सूर्योत्पतिः स्त्री च विधोस्तथाऽद्धित्तं सुतो ज्ञाच्च सुखं गुरोश्च । धर्मः सितादर्कसुताच्च वेश्म ब्रूयात्समुद्वाहविधौ स्वयुक्त्या ॥ " इति ॥ ९३ ॥

अथ संकीर्णजातीनां विशेषं मत्तमयूरच्छंदसाऽऽह——

कृष्णे पक्षे सौरिकुजार्केऽपि च वारे वर्ज्ये नक्षत्रे यदि वा स्यात्करपीडा ॥ संकीर्णानां तर्हि सुतायुर्धनलाभप्रीतिप्राप्त्यै सा भवतीह स्थितिरेषा॥९४॥

कृष्णे पक्ष इति ॥ कृष्णे पक्षे शनिभौमार्कवारे विवाहोक्तनक्षत्रभिन्ननक्षत्रेषु चकाराद्दुष्टयोगेष्वपि संकीर्णानामनुलोमप्रातिलोमजानामपि यदि करपीडा विवाहः स्यात् तर्हि सा करपीडा सुतायुर्धनलाभप्रीतिप्राप्त्यै भवति । एषा स्थितिराचारोऽस्ति । वाग्रहणात्तदभावे प्रागुक्तदिनेऽपि विवाहः कार्य इति ॥ ९४ ॥

अथ गांधर्वादिविवाहे विशेषमनुष्टुभाऽऽह——

गांधर्वादिविवाहेऽर्काद्वेद४नेत्र २ गुणें ३ दवः १॥ कु१युगां४गा६ग्नि ३भू१ रामा३स्त्रिपद्यामशुभाः शुभाः ॥ ९५ ॥

गांधर्वादीति ॥ प्राजापत्यब्राह्मदैवार्षसंज्ञा विवाहा उक्तकाले एव कार्याः । गांधर्वासुरराक्षसपैशाचाख्याः सर्वकाले कार्याः । श्रीपतिः । " प्राजापत्यब्रह्मदैवार्षसंज्ञाः कालेपूक्तेष्वेव कार्या विवाहाः । गांधर्वाख्यश्चासुरो राक्षसश्च पैशाचो वा सर्वकालं विधेयः ॥ " इति । तत्र केचिदर्कात्सूर्यनक्षत्राद्वेदनेत्रादिषु क्रमेण सदसत्स्यात् । अयमर्थः । सूर्याक्रांतनक्षत्रमारभ्य चत्वार्यशुभानि । ततो द्वे शुभे । ततस्त्रीण्यशुभानीति क्रमेण त्रिपद्यां त्रयाणां पदानां समाहारस्त्रिपदी तस्यां ब्रह्मविष्णुरुद्रपदाभिधचक्रत्रये इत्यर्थः । एकस्मिन्नपि पदे यदशुभं तदशुभमेव । पदत्रये यच्छुभं तच्छुभमिति कृत्वा अशुभशुभानि क्रमेण पठितानि । एवं पदत्रयाणां

मुख्यार्थकथनात्पृथक्कथनमनुपयोगः । तथा च पदत्रयमुक्तं भूपाल-वल्लभे । " एवं पदत्रये शुद्धं नक्षत्रं दापयेत्सुधीः । गांधर्वासुरपैशाचराक्षसेषु विचिंतयेत् ॥ " इति ॥ ९५ ॥

अथ विवाहात्प्राक्कर्तव्यानामावश्यककृत्यानां दिनशुद्धिं पृथ्वीच्छंदसाऽऽह—

विधोर्बलमवेक्ष्य वा दलनकंडनं वारकं
गृहांगणविभूषणान्यथ च वेदिकामंडपान् ॥
विवाहविहितोडुभिर्विरचयेत्तथोद्वाहतो
न पूर्वमिदमाचरेत्त्रिनवषण्मिते वासरे ॥ ९६ ॥

विधोर्बलमिति ॥ अत्र चंद्रबलमावश्यकत्वेन विचार्यम् । वारको मंगलकलशः । गृहभूषणं चित्रलेखनादि । अंगणविभूषणं संमार्जनगोमयाद्यालेपः । अथ च वेदिकाचत्वरं वधूवरोपवेशनार्थं स्थलविशेषः । मंडपो गृहाच्छादनम् । कटादिना वितानादिना वा बहुवचनात्कटाहाद्यारोपणहरिद्राचंदनकांजिकाधारणादिसकलशुभारंभान् उद्वाहतः पूर्वं विवाहोक्तैरुडुभिर्नक्षत्रैः पंचांगशुद्धिसहिते दिने रचयेत् । उपलक्षणत्वात्तत्तन्नक्षत्रैरुपनयनादावपि पूर्वं शुभकर्मप्रारंभान्विरचयेत् । तथा इदं कार्यजातं त्रिनवषण्मिते दिने पूर्वं न आचरेत् । " चित्रा विशाखा शततारकाश्विनी ज्येष्ठाभरण्यौ शिवभाच्चतुष्टयम् । हित्वा प्रशस्तं फलतैलवेदिकाप्रदानकं कंडनमंडनादिकम् ॥ " इति दैवज्ञमनोहरोक्तेः । तत्रैव । " मूलेंदुरुद्रश्रवणार्कपौष्णविश्वेशचित्रानलरेवतीषु । संस्थापनं कांजिककुंडिकाया वारे रवेर्भूमिसुतस्य शस्तम् ॥ " इति ॥ ९६ ॥

अथ वेदीलक्षणं मंडपोद्वासने दिननियमं च शालिन्याऽऽह—

हस्तोच्छ्राया वेदहस्तैः समंतात्तुल्या वेदी सद्मतो वामभागे ॥ युग्मे घस्रे षष्ठहीने च पंचसप्ताहे स्यान्मंडपोद्वासनं सत् ॥ ९७ ॥

हस्तोच्छ्रायेति ॥ स्पष्टार्थः । नारदः । " हस्तोच्छ्रिता चतुर्हस्तैश्चतुरस्रा समंततः । स्तंभैश्चतुर्भिः सुश्लक्ष्णैर्वामभागे स्वसद्मनः ॥ मंडपोद्वासनं कार्यं समे तु दिवसे बुधैः । षष्ठं तु विषमं नेष्टं मुक्त्वा पंचमसप्तमौ ॥ " इति ॥ ९७ ॥

कैश्चित्तैलादिलापने संख्यानियम उक्तस्तमाह—

मेषादिराशिजवधूवरयोर्बटोश्च तैलादिलापनविधौ कथिताऽत्र संख्या ॥ शैला दिशः शरदिगक्षनगाद्रिबाणबाणाक्षबाणगिरयो ७।१०।५।१०।५।७ ७।५।५।५।५।७विबुधैस्तु कैश्चित् ॥ ९८ ॥

मेषादिराशिजेति ॥ स्पष्टम् । देशविशेषे औडीछादौ प्रसिद्धम् ९८

अथ प्राप्तशिष्टसंमतं मंडपादौ स्तंभनिवेशनमिंद्रवज्रयाऽऽह—

सूर्येंगनासिंहघटेषु शैवस्तंभोलिकोदंडमृगेषु वायौ ॥ मीनाजकुंभे निर्ऋतौ विवाहे स्थाप्योऽग्निकोणे वृषयुग्मकर्के ॥ ९९ ॥

सूर्येति ॥ कन्यातुलासिंहगतेऽर्के शैवे ईशानकोणे विवाहादौ स्तंभः स्थाप्यः । वृश्चिकधनुर्मकरस्थिते वायुकोणे । मीनमेषकुंभस्थिते निर्ऋतिकोणे । वृषमिथुनकर्कस्थिते अग्निकोणे स्तंभः स्थाप्य इत्यर्थः ॥ ९९ ॥

अथ गोधूलीप्रशंसां मंदाक्रांतयाह—

नास्यामृक्षं न तिथिकरणं नैव लग्नस्य चिंता
नो वा वारो न च लवविधिर्नो मुहूर्तस्य चर्चा ॥
नो वा योगो न मृतिभवनं नैव जामित्रदोषो
गोधूलिः सा मुनिभिरुदिता सर्वकार्येषु शस्ता १००॥

१ समे च दिवसे कुर्याद्देवकोत्थापनं बुधः । इत्यपि पाठः ।

नास्यामिति ॥ स्पष्टार्थम्। गोधूल्यधिकारिण आह नारदः। "प्राच्यानां च कलिंगानां मुख्यं गोधूलिकं स्मृतम्। गांधर्वादिविवाहेषु वैश्योद्वाहे च योजयेत्॥" भूपालवल्लभे। "विप्रेषु घटिकालाभे दातव्यं गोरजो बुधैः। संकीर्णे गोरजः शस्तं परेषु द्वितयं शुभम्॥ घटिकालग्नाभावे कार्यं विप्रैस्तु गोरजोलग्नम्।" इति। "महादोषान्परित्यज्य प्रोक्तान् धिष्ण्यादिकेषु च। कारयेद्गोरजो यावत्तावल्लग्नं शुभावहम्॥" इति। दैवज्ञमनोहरे। "कुलिकं क्रांतिसाम्यं च मूर्तौ षष्ठाष्टगः शशी। पंच गोधूलिके त्याज्या अन्ये दोषाः शुभावहाः॥" इति। तत्र गोधूलिकालः केशवार्केणोक्तः। "अत्रोभयत्र घटिकादलमिष्टमाहुर्ग्राह्यं तदंवरमणेरपि वार्धविंबात्।" इति। केचित्तु "यावद्दिनांते दिशि पश्चिमायां पश्येत्तृतीयं रविबिंबभागम्। तस्मात्परं नाडिकयुग्ममेके गोधूलिकालं मुनयो वदंति॥"॥ १००॥

अथ गोधूलिभेदं जलधरमालाछंदसाह—

पिंडीभूते दिनकृति हेमंततौं स्यादर्धास्ते तपससमये गोधूलिः॥ संपूर्णास्ते जलधरमालाकाले त्रेधा योज्या सकलशुभे कार्यादौ॥ १०१॥

पिंडीभूत इति॥ हेमंततौं शीतकाले मार्गादिमासचतुष्टये दिनकृति सूर्ये पिंडीभूते गोलकसदृशे संध्यायां नीहारावृतत्वेन निष्प्रभे इत्यर्थः। तस्मिन्समये गोधूलिर्ज्ञेया। तथा तपसमये उष्णकाले चैत्रादिमासचतुष्टये अर्धास्ते अर्धबिंबस्य दृश्यत्वे गोधूलिः। जलधरा मेघास्तेषां माला समूहस्तस्योत्पादककाले वर्षाकाले श्रावणादिमासचतुष्टये सूर्ये संपूर्णास्ते संपूर्णमस्तमदर्शनं यस्य तादृशे सति गोधूलिः। जलधरमालाशब्देन च्छंदोनामापि सूचितम्। न केवलमियं विवाहे किंतु सकलशुभे कार्यादौ ज्ञेया॥ १०१॥

अथ गोधूलिसमये अवश्यवर्ज्यानि वैश्वदेवीछन्दसाह—

अस्तं याते गुरुदिवसे सौरे सार्के लग्नान्मृत्यौ रिपुभवने लग्ने चेंदौ ॥ कन्यानाशस्तनुमदमृत्युस्थे भौमे वोढुर्लाभे धनसहजे चंद्रे सौख्यम् ॥ १०२ ॥

अस्तं याते इति ॥ गोधूलिरित्यनुवर्तते । बृहस्पतिवारे सूर्ये अस्तं याते गोधूलिः शुभा स्यात् नतु पूर्वम् । अर्द्धयामसद्भावात् । तथा सौरे शनौ सार्के सत्येव गोधूलिः शुभा । न त्वस्तानंतरम् । कुलिकसद्भावात् । क्रांतिसाम्यमपि त्याज्यम् । तथा लग्नात् सायंकालीनलग्नान्मृत्यावष्टमे रिपुभवने षष्ठे वा लग्ने एव वा चन्द्रे सति कन्यानाशः स्यात् । लग्ने इति । लग्नस्थे मदनस्थे मृत्युस्थे वा भौमे सति वोढुर्वरस्य नाशः स्यात् । शेषं स्पष्टम् ॥ १०२ ॥

अथ सूर्यस्पष्टगतिमिंद्रवज्रयाह—

मेषादिगेऽर्केऽष्टशरा ५८ नगाक्षाः ५७ सप्तेषवः ५७ सप्तशरा ५७ गजाक्षाः ५८ ॥ गोक्षाः ५९ खतर्काः ६० कुरसाः ६१ कुतर्काः ६१ कंगानि ६१ षष्टि ६० र्नव पंच ५९ भुक्तिः ॥ १०३ ॥

मेषादिगे इति ॥ मेषादिद्वादशराशिषु स्थूला कलात्मिका स्पष्टा गतिरित्यर्थः ॥ १०३ ॥

सूर्यस्य तात्कालिकीकरणमनुष्टुभाह—

संक्रांतियातघस्राद्यैर्गतिर्निघ्नी खषड्६० हृता ॥ लब्धेनांशादिना योज्यं यातर्क्षे स्पष्टभास्करः ॥ १०४ ॥

संक्रांतियातेति ॥ पंचांगे यद्दिने यावतीषु घटिषु पलेषु च संक्रांतिस्तत आरभ्य स्वाभीष्टदिनपर्यंतं यावंति दिनानि घटीपलानि भवंति तैर्मेषादीष्टराशिस्थेऽर्के सति तत्सूर्यस्थूलस्पष्टगतिर्गुणनीया षष्ट्या भाज्या यल्लब्धं तेंऽशाः । अवशिष्टं कलादि येंऽशावयवास्ते

आदिशब्दवाच्याः तैर्यातर्क्षं यातराशिः सूर्यभुक्तमेषादिराशिर्युक्तः सन् तात्कालिकः स्पष्टभास्करः स्यात् ॥ १०४ ॥

अथ लग्नानयनमनुष्टुभाह—

तनोरिष्टांशकात्पूर्वं नवांशा दशसंगुणाः ॥
शंमाप्ता लब्धमंशाद्यं तनोर्वर्गादिसाधने ॥ १०५ ॥

तनोरिति ॥ लग्नस्य क्रियमृगास्येत्यादिना यो नवांशो विचारितः स यावत्संख्याक आगच्छेत्तत्पूर्वनवांशा यावंतः स्युस्ते दशगुणाः रामैस्त्रिभिराप्ता यल्लब्धमंशाद्यमंशकलाविकलात्मकं तत्तनोरिष्टकालिकं भुक्तं स्यात्तेन कृत्वा प्रागुक्तकुजशुक्रसौम्येत्यादिप्रकारेण षड्वर्गसाधनं स्यात् ॥ १०५ ॥

अथैवं साधिताभ्यां रविलग्नाभ्यां घटिकानयनं शालिन्याह—

अर्काल्लग्नात्सायनाद्भोग्यभुक्तैर्भागैर्निघ्नात्स्वोदयात्खाग्निभक्तात् ॥ भोग्यं भक्तं चांतरालोदयाढ्यं
षष्ट्या भक्तं स्वेष्टनाड्यो भवेयुः ॥ १०६ ॥

अर्कादिति ॥ अयनांशसहितसूर्यात् राशिभोग्यांशैः सायनसूर्याक्रांतराशेः स्वदेशीय उदयो मेषादिराशीनां पलात्मकं प्रमाणं गुण्यं खाग्निभिस्त्रिंशता भक्तं लब्धानि भोग्यानि पलानि स्युः । एवं लग्नात्सायनांशात् भुक्तांशैः स्वोदयो गुण्यः खाग्निभक्तो लब्धानि भुक्तानि पलानि । एवं जातानां भोग्यभुक्तपलानामैक्यं कार्यं तत्सायनांशलग्नार्कयोरंतरालोदयपलैर्युक्तं कार्यं षष्ट्या भक्तं सूर्योदयादिष्टघटिका भवेयुः ॥ १०६ ॥

विशेषं शालिन्याह—

चेल्लग्नार्कौ सायनावेकराशौ तद्विश्लेषघ्नोदयः खाग्निभक्तः ॥ स्पष्टः कालो लग्नमूनं यदार्काद्रात्रेः
शेषोऽर्कात्स षड्भान्निशायाम् ॥ १०७ ॥

चेल्लग्नार्काविति ॥ सायनांशौ लग्नार्कौ एकराशौ भवतस्तयोर्वि-श्लेषोंऽतरांशास्तैर्गुणितः स्वदेशीय उदयः ततः खाग्निभक्तो लब्ध-मिष्टकालः सूर्योदयात्स्यात् । तत्र यदाऽर्कात्सायनादेकराशिस्थितं लग्नमूनं स्यात् तदा य इष्टकाल आगतः स सूर्योदयात्प्राग्रात्रिशेषो भवेत् । अयमर्थः। आगत इष्टकालः षष्ट्यां प्रपात्य प्राग्दिनीयसूर्यो-दयानंतरमेतावानिष्टकालः । अथ वा रात्रिमानात्प्रपात्य प्राग्दिनी-यसूर्यास्तानंतरमेतावानिष्टकालः । अथ रात्रौ विशेष उच्यते । नि-शायां रात्रौ सूर्यात् सषड्भात् राशिषट्कयुक्तात्प्रागुक्तप्रकारेणार्का-ल्लग्नादित्यादिनेष्टकालः साध्यः स सूर्यास्तानंतरं भवेत् । एवमानीते इष्टकाले अंशप्रवृत्तेः पंच पलानि योज्यानि इति संप्रदायः । तत्स-मये परस्परदर्शनं कार्यमित्याह कश्यपः । "अन्योन्यवीक्षणं सम्यक् सुलग्ने कारयेत्सदा ।" इति । सुलग्नसाधनं घटिकायंत्रेण । तत्र घटी-स्थापने नारदः । "ताम्रपात्रे जलैः पूर्णे गंधपुष्पैरलंकृते । तंडुलस्थे रत्नयुते शुचिभूमावहर्पतेः ॥ मण्डलार्धोदयं वीक्ष्य जलपात्रे विनिक्षि-पेत् । तत्र मन्त्रः । यन्त्राणां मुख्ययन्त्र त्वमिति धात्रा पुरा कृतम् ॥ दंपत्योरायुरारोग्यसुपुत्रधनहेतवे । जलयंत्रकमेतस्मादिष्टसिद्धिप्रदं भवेत् ॥ अथवा साधयेत्कालं द्वादशांगुलशंकुना । " इति । शंकुघ-टीज्ञानं रामविनोदे मयोक्तं तत एव ज्ञेयम् ॥ १०७ ॥

अथ विवाहादौ शुभकार्येऽवश्यवर्ज्यानविस्मरणार्थं
शार्दूलविक्रीडितत्रयेणाह—

उत्पातान्सह पातदग्धतिथिभिर्दुष्टांश्च योगांस्तथा चंद्रेज्योशनसामथास्तमयनं तिथ्याः क्षयर्द्धी त-था॥ गंडांतं च सविष्टिसंक्रमदिनं तन्वंशपास्तं त-था तन्वंशेशविधूनथाष्टरिपुगान्पापस्य वर्गांस्तथा ॥ १०८ ॥ सेंदुक्रूरखगोदयांशमुदयास्ताशुद्धिचं-डायुधान्खार्जूरं दशयोगयोगसहितं जामित्रलत्ता-

व्यधम् ॥ बाणोपग्रहपापकर्तरि तथा तिथ्यृक्षवारोत्थितं दुष्टं योगमथार्धयामकुलिकाद्यान्वारदोषानपि ॥१०९॥ क्रूराक्रांतविमुक्तभं ग्रहणभं यत्पूरगंतव्यभं त्रेधोत्पातहतं च केतुहतभं संध्योदितं भं तथा॥ तद्वच्च ग्रहभिन्नयुद्धगतभं सर्वानिमान्संत्यजेदुद्वाहे शुभकर्मसु ग्रहकृतान् लग्नस्य दोषानपि ॥ ११० ॥

इति मुहूर्तचिंतामणौ षष्ठं विवाहप्रकरणं समाप्तम् ॥६॥

उत्पातानिति । सेंदुक्रूरेति । क्रूराक्रांतेति च ॥ उत्पातादीनुद्वाहे विवाहे यज्ञोपवीतादौ शुभकर्मसु च त्यजेदिति तृतीयश्लोकेनान्वयः। उत्पातान् दिव्यभौमांतरिक्षान्। लक्षणया तत्संबंधिसप्त वर्ज्यान् दिवसान्। पातो महापातः।क्रांतिसाम्यमिति यावत् । दग्धतिथयश्चापांत्यगे गोघटगे इत्यादिनोक्ताः । एतैः सह उत्पातं त्यजेदित्यर्थः । तथा दुष्टान्व्यतीपातादियोगान् । चन्द्रगुरुशुक्राणामस्तमयनमस्तम्। तिथ्याः क्षयर्द्धी तिथिक्षयं तिथिवृद्धिं च गंडांतं तिथिनक्षत्रलग्नानां त्रिविधम् । विष्टिर्भद्रा। संक्रमदिनं संक्रमकालादुभयतो वर्ज्या घटिका अयने विषुवे च पूर्वापरदिनसहितसंक्रांतिदिनं ज्ञेयम्। ताभ्यां सहितमिति पूर्वेण संबंधः। तन्वंशपास्तं तनुर्लग्नं अंशो लग्नगतो विहितनवांशः तौ पातः तौ तन्वंशपौ तयोरस्तम् । लग्नेशास्तं लग्ननवांशस्वाम्यस्तं च । तथा तन्वंशेशविधून् लग्नेशनवांशेशचंद्रान् अष्टमषष्ठस्थानगान् तथा पापग्रहवर्गान् सेंदुक्रूरखगोदयांशम् । इंदुसहितं लग्नं लग्नांशं च क्रूरग्रहसहितं लग्नं लग्नांशं चेत्यर्थः । उदयास्तशुद्धिमुदयशुद्धिमस्तशुद्धिं च इतरथा ज्ञेयमशुभमित्याद्युक्ताम् । चंडायुधं हर्षणवैधृतिसाध्येत्यादिनोक्तम् । खार्जूरं व्याघातगंड इत्यादिनोक्तम् । दशयोगः सूर्यर्क्षचंद्रर्क्षयुतेर्भशेष इत्यादिनोक्तः । योगो ग्रहयुतिः तत्सहितम् । जामित्रलत्ताव्यधं जामित्रं

लग्नजामित्रं चंद्रजामित्रं च लग्नाचंद्रान्मदनभवनगे इत्यादिनोक्तम् । लत्ता ज्ञराहुपूर्णेंदुसिता इत्यादिनोक्ता । व्यधं पंचशलाकासप्तशलाकोक्तं च । वाणाः पंचकम् । उपग्रहः प्रसिद्धः शराष्टदिक्शक्रनगेत्यादिः । पापकर्तरिसमाहारद्वंद्वैकवचनम् । तिथ्यृक्षवारोत्थितं दुष्टयोगं तिथिनक्षत्रवारैः कृत्वोत्थितमुत्पन्नं दुष्टयोगम् । यथा । तिथिनक्षत्रोत्थं सार्पे द्वादश्यां वैश्वमादिम इत्यादि । तिथिवारोद्भवं सूर्येशपंचेत्यादि । नक्षत्रवारोद्भवं याम्यं त्वाष्ट्रमित्यादि । तिथिनक्षत्रवारोद्भवं हस्तार्के पंचमीतिथावित्यादि दुष्टयोगम् । अर्धयामकुलिकाद्यान्वारदोषानपि आदिशब्देन दुर्मुहूर्तादिकं च । क्रूराक्रांतविमुक्तभं क्रूरग्रहेण युक्तभं क्रूरविमुक्तभं च ग्रहणभं यस्मिन्नक्षत्रे चंद्रसूर्योपरागो जातस्तद्भम् । क्रूरस्य गंतव्यभम् । त्रेधोत्पाताः त्रिविधोत्पाताः दिव्यभौमांतरिक्षाः तैर्हतं भम् । तन्मासषट्कं त्याज्यम् । एवं ग्रहणनक्षत्रमपि । केतुहतभं केतुना धूननैः स्पर्शनैश्च यन्नक्षत्रं हतम् । अनेन नक्षत्रांतरेऽपि दोषः । संध्योदितं भं सूर्यास्तकाले यन्नक्षत्रस्य क्षितिजे उदयः तत्सूर्यनक्षत्राच्चतुर्दशं नक्षत्रमित्यर्थः । तद्वच्च ग्रहभिन्नयुद्धगतभं ग्रहेण भेदितं ग्रहयुद्धगतं च षण्मासं निषिद्धम् । तथा ग्रहकृतान् लग्नस्य दोषान्व्यये शनिः । खेऽब्जनिज इत्यादिकान् लग्नसंबंधिदोषान् संत्यजेत् । मूलवाक्यानि पूर्वमेव लिखितानि ॥ १०८ ॥ १०९ ॥ ११० ॥

इति मुहूर्तचिंतामणौ प्रमिताक्षरायां षष्ठं विवाहप्रकरणं समाप्तम् ॥६॥

अथ वधूप्रवेशप्रकरणप्रारंभः ॥ ७ ॥

अथ वधूप्रवेशो नाम नूतनपरिणीताया वध्वाः प्रथमतः क्रियमाणो भर्तृगृहे प्रवेशो वधूप्रवेशस्तन्मुहूर्त्तमुपेंद्रवज्रयाह—

समाद्रिपंचांकदिने विवाहाद्वधूप्रवेशोऽष्टिदिनांतराले ॥ शुभः परस्ताद्विषमाब्दमासदिनेक्षवर्षात्परतो यथेष्टम् ॥ १ ॥

समाद्रीति ॥ विवाहाद्विवाहदिवसादारभ्याष्टिदिनांतराले षोडशदिनमध्ये समाद्रिपंचांकदिने समदिनानि द्वितीयचतुर्थषष्ठाष्टमदशमद्वादशचतुर्दशषोडशानि । विषमदिनमध्ये सप्तमपंचमनवमदिनानि तेषु वधूप्रवेशः शुभः । नारदः । " आरभ्योद्वाहदिवसात्षष्ठे वाप्यष्टमे दिने । वधूप्रवेशः संपत्त्यै दशमेऽथ समे दिने ॥ " षष्ठादीनां समत्वादेव ग्रहणे सिद्धे पुनस्तदुक्तिरतिप्राशस्त्यार्था । " वधूप्रवेशनं कार्यं पंचमे सप्तमे दिने । नवमे च शुभे वारे सुलग्ने शशिनो बले ॥" इति ज्योतिर्निबंधे । षोडशदिवसानंतरं वधूप्रवेशस्तदा विषमाब्दमासदिने विषमवर्षे विषममासे विषमदिने च कार्यः । अक्षवर्षादिति । पंचवर्षादनंतरं विषमवर्षादिनियमो नास्ति । किंतु दोषरहितकाले वधूप्रवेशो विधेयः । उक्तं च । " विवाहमारभ्य वधूप्रवेशो युग्मे दिने षोडशवासरांतः । ऊर्ध्वं ततोऽब्देऽयुजि पंचमांतं पुनः पुरस्तान्नियमो न चास्ति ॥ " इति ॥ १ ॥

अथ नक्षत्रशुद्धिमनुष्टुभाऽऽह--

ध्रुवक्षिप्रमृदुश्रोत्रवसुमूलमघानिले ॥
वधूप्रवेशः सन्नेष्टो रिक्तारार्के बुधे परैः ॥ २ ॥

ध्रुवेति ॥ ध्रुवादिनक्षत्रेषु वधूप्रवेशः सन् शुभफलः । रिक्तारार्के रिक्तासु (४।९।१४) आरे भौमे अर्के रवौ न इष्टः । अर्थादन्यतिथिषु रविभौमव्यतिरिक्तवारेषु शस्त इत्यर्थः । अपरैर्बुधवारेऽपि नेष्टः ॥ २ ॥

अथ विशेषं महेंद्रवज्रयाऽऽह--

ज्येष्ठे पतिज्येष्ठमथाधिके पतिं हंत्यादिमे भर्तृगृहे
वधूः शुचौ ॥ श्वश्रूं सहस्ये श्वशुरं क्षये तनुं तातं
मधौ तातगृहे विवाहतः ॥ ३ ॥

इति मुहूर्तचिंतामणौ सप्तमं वधूप्रवेशप्रकरणं समाप्तम् ७॥

ज्येष्ठे पतिज्येष्ठमिति ॥ विवाहतो विवाहानंतरमादिमे ज्येष्ठे भर्तृ-

गृहे स्थिता वधूः पतिज्येष्ठं हंति । आदिमे अधिके पतिं भर्तारं हंति । आदिमे शुचावाषाढे श्वश्रूं भर्तृजननीं हंति । आदिमे सहस्ये पौषे श्वशुरं भर्तुः पितरं हंति । आदिमे क्षये क्षयमासे भर्तृगृहे तिष्ठंती तनुं निजं शरीरं हंति । म्रियत इत्यर्थः । तथा आदिमे मधौ चैत्रे तातगृहे पितृगृहे तिष्ठंती तातं पितरं हंतीत्यर्थः । यदि पित्राद्यभावस्तर्हि तन्मासतद्गृहावस्थितौ सत्यामपि न कोऽपि दोष इत्यर्थः । न भयं तेषामभावे इत्युक्तेः । ज्योतिर्निबंधे । " विवाहात्प्रथमे पौषे आषाढे चाधिमासके । न सा भर्तृगृहे तिष्ठेच्चैत्रे तातगृहेऽपि च ॥ " आषाढो ज्येष्ठोपलक्षकः ॥ ३ ॥

इति मुहूर्तचिंतामणौ प्रमिताक्षरायां सप्तमं वधूप्रवेश-
प्रकरणं समाप्तम् ॥ ७ ॥

अथ द्विरागमनप्रकरणप्रारंभः ॥ ८ ॥

अथ द्विरागमनप्रकरणं व्याख्यायते । तत्र वधूप्रवेशानंतरं परावृत्त्य पितृगृहं प्राप्ताया वध्वाः पुनर्भर्तृगृहे प्रवेशो द्विरागमनशब्द-वाच्यः तन्मुहूर्तं पंचचामरच्छंदसाऽऽह—

चरेदथौजहायने घटालिमेषगे रवौ रवीज्यशुद्धियोगतः शुभग्रहस्य वासरे ॥ नृयुग्ममीनकन्यकातुलावृषे विलग्नके द्विरागमं लघुध्रुवे चरेऽस्रपे मृदूडुनि ॥ १ ॥

चरेदिति ॥ अथानंतरं वक्ष्यमाणेषु लघुध्रुवादिनक्षत्रेषु ओजहायने विषमवर्षे प्रथमतृतीयादिवर्षे तथा घटालिमेषगे रवौ कुंभे वृश्चिके मेषे रवौ सति तथा वरस्य रवीज्यशुद्धियोगतः । शुभग्रहस्य वारे मिथुनमीनकन्यातुलावृषाणामन्यतमे लग्ने शुभयुतदृष्टे सति । लघुध्रुवचराणि प्रसिद्धानि अस्रपो मूलं मृदूनि प्रसिद्धानि एतेषु द्विरागमं चरेत्कुर्यात् । अत्र सामान्यतः गुरुशुक्रास्तादिविचारः पूर्वोक्त एव ज्ञेयः ॥ १ ॥

अथ संमुखशुक्रदोषं प्रहर्षिण्याऽऽह—

दैत्येज्यो ह्यभिमुखदक्षिणे यदि स्याद्गच्छेयुर्नहि शिशुगर्भिणी नवोढा ॥ बालश्चेद्व्रजति विपद्यते नवोढा चेद्वंध्या भवति च गर्भिणी त्वगर्भा ॥ २ ॥

दैत्येज्य इति ॥ दैत्येज्यः शुक्रः । गंतव्यादिगभिमुखे गंतुर्दक्षिणभागे वा स्थितः स्यात्तदा शिशुर्बालकः गर्भिणी गर्भवती नवोढा नूतनपरिणीता एता न गच्छेयुः । यदि प्रतिशुक्रं गच्छेयुस्तदेत्याह । बाल इति । चेद्बालो गच्छति तदा विपद्यते म्रियते नवोढा चेद्व्रजति तदा वंध्या अपत्यसंभावनारहिता स्यात् । गर्भिणी चेद्व्रजति तदा अगर्भा गर्भस्रावती स्यात् । यदि शुक्रः पूर्वस्यामुदितः पूर्वां गंतुः संमुखः उत्तरां गंतुर्दक्षिणः पश्चिमां गंतुः पृष्ठे दक्षिणां गंतुर्वामे स्यात् । तदा पूर्वोत्तरे दिशौ न गच्छेत् । यदि पश्चिमायामुदितः शुक्रः तदा पश्चिमां गंतुः संमुखः । दक्षिणां गंतुर्दक्षिणः । पूर्वां गंतुः पृष्ठे । उत्तरां गंतुर्वामे । तदा पश्चिमदक्षिणदिशौ न गच्छेत् । केचिद्दीपोत्सवप्रतिपदि नक्षत्रादिनियमं विनैव वधूप्रवेशं वांछंति । उक्तं च । " अस्तंगते गुरौ शुक्रे सिंहस्थे वा बृहस्पतौ । दीपोत्सवदिने चैव कन्या भर्तृगृहं विशेत् ॥ " इति॥२॥

अथ प्रतिशुक्रापवादं मंजुभाषिण्याऽऽह—

नगरप्रवेशविषयाद्युपद्रवे करपीडने विबुधतीर्थयात्रयोः ॥ नृपपीडने नववधूप्रवेशने प्रतिभार्गवो भवति दोषकृन्न हि ॥ ३ ॥

नगरप्रवेशेति ॥ विषयो देशः आदिशब्देन ग्रामः । तस्योपद्रवे अन्यराजकृतोपद्रवे वा सति गंतव्यदिशि प्रतिशुक्रदोषो नास्ति । करपीडने विवाहोद्देशेन यात्रायां सत्यां विबुधा देवास्तेषां यात्रा यथा नगरकोटयात्रा तीर्थयात्रा प्रयागादिका तयोः नृपपीडने

राज्ञः सकाशात् पीडायां दंडादिकृतायां सत्यां नववधूर्नूतनपरिणीता वधूः तस्याः प्रवेशे प्रतिभार्गवः संमुखशुक्रः दोषकृन्न हि भवति । भार्गवः । " स्वभवनपुरप्रवेशे देशानां विभ्रमे तथोद्वाहे । नूतनवध्वा गमने प्रतिशुक्रविचारणं नास्ति ॥ एकग्रामे पुरे वापि दुर्भिक्षे राजविप्लवे । विवाहे तीर्थयात्रायां प्रतिशुक्रो न दुष्यति ॥" इति बादरायणोक्तेः ॥ ३ ॥

अथ प्रौढस्त्रीणां द्विरागमने तथा गोत्रपरत्वेन च प्रतिशुक्रापवादांतरमिंद्रवंशयाऽऽह—

पित्र्ये गृहे चेत्कुचपुष्पसंभवः स्त्रीणां न दोषः प्रतिशुक्रसंभवः॥ भृग्वंगिरोवत्सवसिष्ठकश्यपात्रीणां भरद्वाजमुनेः कुले तथा ॥ ४ ॥

इति मु० अष्टमं द्विरागमनप्रकरणं समाप्तम् ॥ ८ ॥

पित्र्ये गृह इति ॥ पितुरिदं पित्र्यं तस्मिन्पित्र्ये गृहे कुचौ स्तनौ पुष्पमृतुस्तत्संभवः स्यात्तदा स्त्रीणां प्रतिशुक्रसंभवो दोषो नास्ति । उपलक्षणत्वाद्भर्तुः सूर्यगुरुशुद्धिराहित्यसंभवोऽपि दोषो नास्तीत्यपि ज्ञेयम् । चंडेश्वरः । " पित्र्यागारे कुचकुसुमयोः संभवो वा यदि स्यात्पत्युः शुद्धिर्न भवति रवेः संमुखो वाथ शुक्रः । शुक्रे लग्ने गुणवति तिथौ चन्द्रताराविशुद्धौ स्त्रीणां यात्रा भवति सफला सेवितुं स्वामिसद्म ॥ " अथ भृग्वंगिरोवत्सवसिष्ठकश्यपात्रीणां भरद्वाजमुनेः कुले । कोऽर्थः । एतद्वंशोत्पन्नानां प्रतिशुक्रसंभवो दोषो नास्ति । बादरायणः । " कश्यपेषु वसिष्ठेषु भृग्वत्र्यंगिरसेषु च । भारद्वाजेषु वत्सेषु प्रतिशुक्रो न दुष्यति ॥ " इति । अयं चापवादो यात्रामात्रसाधारणः । केचिदमुमपवादं बुधसंमुखेऽप्यूचुः । महेश्वरः । " तीर्थानां गमने तथैकनगरे ग्रामे च सौम्यं तथा । " इति ॥ ४ ॥

इति दै० प्रमिताक्षरायां द्विरागमनप्रकरणं समाप्तम् ॥ ८ ॥

अथाग्न्याधानप्रकरणप्रारंभः ॥ ९ ॥

अथाग्न्याधानप्रकरणं व्याख्यायते यत्र तु कालनियमेनाधानादिविहितं तत्र न मुहूर्तविचारः यदा तु कालनियमाभावस्तदा मुहूर्तो विचार्य एवेत्यभिसंधायाग्न्याधानादिमुहूर्तं वसंततिलकयाह—

स्यादग्निहोत्रविधिरुत्तरगे दिनेशे मिश्रध्रुवांत्यशशिशक्रसुरेज्यधिष्ण्ये ॥ रिक्तासु नो शशिकुजेज्यभृगौ न नीचे नास्तंगते न विजिते न च शत्रुगेहे ॥ १ ॥

स्यादग्निहोत्रविधिरिति ॥ उत्तरगे दिनेशे उत्तरायणगते सूर्ये सति मिश्रे कृत्तिकाविशाखे ध्रुवाणि रोहिण्युत्तरात्रयं अंत्यं रेवती शशी मृगः शक्रो ज्येष्ठा सुरेज्यधिष्ण्यं पुष्यः एषु नक्षत्रेषु अग्निहोत्रविधिः स्यात् । रिक्तासु नो कार्यम् । चन्द्रमंगलगुरुशुक्रेषु नीचगतेषु अस्तंगतेषु ग्रहांतरैर्विजितेषु तथा शत्रुगृहस्थितेषु अग्न्याधानं नो कार्यम् ॥ १ ॥

अथ लग्नशुद्धिं वसंततिलकयाऽऽह—

नो कर्कनक्रझषकुंभनवांशलग्ने नोऽब्जे तनौ रविशशीज्यकुजे त्रिकोणे ॥ केंद्रर्क्षषट्त्रिभवगे च परैस्त्रिलाभषट्खस्थितैर्निधनशुद्धियुते विलग्ने ॥ २ ॥

नो कर्केति ॥ कर्कमकरमीनकुंभानां नवांशे लग्ने चाग्न्याधानं नो कार्यम् । लग्ने चन्द्रे सति नो कार्यम् । चन्द्रस्योपलक्षणत्वाच्छुक्रेऽपि लग्ने सति नो कार्यम् । "यस्य चाधानलग्नस्थे चन्द्रे च भृगुनंदने । उपैति तस्य जातोऽग्निर्निर्वाणं सततं कुले ॥" इति कश्यपोक्तेः । रविशशीज्येति । सूर्यचन्द्रगुरुभौमेषु त्रिकोणकेंद्रर्क्षषट्त्रिभवगेषु नवमपंचमलग्नचतुर्थसप्तमदशमषष्ठतृतीयस्थानास्थितेषु सत्सु परैर्बुधशुक्रशनिराहुकेतुभिः त्रिलाभषट्खस्थितैः तृतीयैकादशषष्ठदशमस्था-

नस्थितैः सद्भिः आधानं हितं स्यात् । निधनेति । अष्टमस्थानशुद्धियुते लग्ने अष्टमस्थाने शुभग्रहोऽपि न शुभः । अथवा निधनशुद्धियुते इति । निधनमष्टमं लग्नं कस्मादित्याकांक्षायामाधानकर्तुर्जन्मराशिलग्नाभ्यामष्टमं लग्नमित्यर्थः । तस्य शुद्धत्वं तदभाव इति यावत् । तेन युक्ते लग्ने इत्यर्थः । अत्र व्याख्यानद्वयेऽपि प्रमाणसद्भावात् द्वयमपि युक्तम् । अत्र निधनशुद्धिश्च ताभ्यां युते लग्न इत्यर्थः ॥ २ ॥

अथाग्न्याधानकर्तुराधानलग्नवशाद्यागकर्तृत्वयोगाननुष्टुभाऽऽह—

चापे जीवे तनुस्थे वा मेषे भौमेऽबरे द्युने ॥
षट्त्र्यायेऽब्जे रवौ वा स्याज्जाताग्निर्यजति ध्रुवम् ॥ ३ ॥
इति श्रीमुहूर्त्तचिंतामणौ नवममग्न्याधानप्रकरणं समाप्तम् ॥ ९ ॥

चाप इति ॥ जीवे गुरौ चापे धनुःस्थे लग्नगे सति आधानलग्ने धनुराख्ये गुर्वधिष्ठिते सतीत्यर्थः । अयमेको योगः । अथवा भौमे मेषलग्नस्थिते सति अयं द्वितीयो योगः । अथवा आधानलग्नाद्दशमे सप्तमे वा भौमे सति योगद्वयमेतत् । अथवा अब्जे चन्द्रे षष्ठतृतीयैकादशस्थानस्थे सति योगत्रयमेतत् । अथवा षट्त्र्याये रवौ सूर्ये सति योगत्रयमेतत् । एवंविधे लग्ने यो जाताग्निरग्निहोत्रकर्ता ध्रुवं निश्चयेन यजति । ज्योतिष्टोमादियागं करोतीत्यर्थः ॥ ३ ॥

इति श्रीदैवज्ञानंतसुतदैवज्ञरामविरचितप्रमिताक्षरायां नवममग्न्याधानप्रकरणं समाप्तम् ॥ ९ ॥

अथ राजाभिषेकप्रकरणप्रारंभः ॥ १० ॥

अथ राजाभिषेकप्रकरणं व्याख्यायते । तत्र कालशुद्धिमिंद्रवंशयाऽऽह—

राजाभिषेकः शुभ उत्तरायणे गुर्विंदुशुक्रैरुदितैर्ब-

लान्वितैः ॥ भौमार्कलग्नेशदशेशजन्मपैर्नो चैत्र-रिक्तारनिशामलिम्लुचे ॥ १ ॥

राजाभिषेक इति ॥ उत्तरायणगते सूर्ये सति तथा गुर्विंदुशुक्रैः बृहस्पतिचन्द्रशुक्रैरुदितैः सद्भिः । तथा भौमार्कौ प्रसिद्धौ । लग्नेशो जन्मलग्नेशः । दशेशो वर्तमानजातकीयमहादशांतर्दशयोः स्वामिनोः जन्मपो जन्मराशिस्वामी एतैर्बलान्वितैः उच्चस्वगृहादिगृहस्थैः सद्भिः राजाभिषेकः शुभ उक्तः । नो चैत्रेति । चैत्रमासः रिक्ताः (४ । ९ । १४) आरो भौमः । निशा रात्रिः । मलिम्लुचोऽधिमासः एषु राजाभिषेको नो कार्यः । कुत्रचित् भौमवार उक्तः स सेनापत्यभिषेकपरो ज्ञेयः । भौमस्य सेनापतित्वात् । गोविप्रराज्यपितृकर्मचतुष्पदेऽपीति चतुष्पदे राज्याभिषेक उक्तः सोऽमावास्यायां भवत्येवेति ॥ १ ॥

अथाभिषेके नक्षत्राणि लग्नशुद्धिं चेंद्रवंशयाऽऽह—

शाक्रश्रवःक्षिप्रमृदुध्रुवोडुभिः शीर्षोदये वोपचये शुभे तनौ ॥ पापैस्त्रिषष्ठायगतैः शुभग्रहैः केंद्रत्रिकोणायधनत्रिसंस्थितैः ॥ २ ॥

शाक्रश्रवेति ॥ शाक्रो ज्येष्ठा । श्रवः श्रवणः । क्षिप्राण्यश्विनीपुष्यहस्ताः । मृदूनि चित्रामृगरेवत्यनुराधाः । ध्रुवाणि रोहिण्युत्तरात्रयम् । एतैर्नक्षत्रे राजाभिषेकः शुभः । अत्र चित्राग्रहणम् । " ज्येष्ठाश्रवःक्षिप्रमृदुध्रुवेषु सौम्यग्रहस्याह्नि तिथौ च रिक्ता । " इति महेश्वरवचनात् । अन्यग्रंथे तदभावात् । शीर्षोदय इति । शीर्षोदया मिथुनसिंहकन्यातुलावृश्चिककुंभाख्याः । एषु अथवा उपचये स्वजन्मलग्नात्स्वजन्मराशेर्वा उपचये त्रिषडेकादशदशमानामन्यतमे लग्ने सति । शुभे शुभग्रहे तनौ लग्नगते सति । शुभग्रहदृष्टे वा सति अभिषेकः शुभः । कश्यपः । " जन्मराशेरुपचये लग्ने शीर्षोदये स्थिरे । शुभग्रहे शितयुते न युते वीक्षिते परैः ॥ " इति ।

पापैरिति । पापग्रहैः । तृतीयषष्ठैकादशस्थानस्थितैः । शुभग्रहैः प्रथमचतुर्थसप्तमदशमनवमपंचमैकादशद्वितीयतृतीयस्थानस्थितैः । राजाभिषेकः शुभः ॥ २ ॥

अथ स्थानविशेषे पापग्रहैरशुभं फलं सापवादमिंद्रवंशयाऽऽह—

पापैस्तनौ रुङ्निधने मृतिः सुते पुत्रार्तिरर्थव्ययगै-र्दरिद्रता ॥ स्यात्खेऽलसो भ्रष्टपदो द्युनांबुगैः सर्वं शुभं केंद्रगतैः शुभग्रहैः ॥ ३ ॥

पापैरिति ॥ तनौ लग्नस्थितैः पापैर्ग्रहैः रुक् रोगः स्यात् । राज्ञ इति शेषः । निधनेऽष्टमे पापग्रहैः मृतिः स्यात् । सुते पंचमे पापग्रहैः पुत्रार्तिः पुत्रपीडा स्यात् । अर्थव्ययगैः द्वितीयद्वादशगैः । पापैर्दरिद्रता स्यात् । खे दशमे पापैरलसो निरुद्योगः स्यात् । द्युनांबुगैः सप्तमचतुर्थस्थानस्थैः पापग्रहैः भ्रष्टपदो भ्रष्टैश्वर्यः स्यात् । अथापवाद माह । सर्वं शुभमिति । केंद्रगतैः शुभग्रहैः सर्वं प्रागुक्तं दुष्टफलं शुभं शुभोदर्कं स्यात् ॥ ३ ॥

अथ विशेषं भुजंगप्रयातेनाह—

गुरुर्लग्नकोणे कुजारौ सितः खे स राजा सदा मोदते राजलक्ष्म्या ॥ तृतीयायगौ सौरिसूर्यौ खबंध्वोर्गुरुश्चेद्धरित्री स्थिरा स्यान्नृपस्य ॥ ४ ॥

इति मुहूर्तचिंतामणौ दशमं राजाभिषेकप्रकरणं समाप्तम् ॥ १० ॥

गुरुर्लग्नकोण इति ॥ लग्ने गुरुश्चेत्स्यादथवा कोणे नवपंचमे गुरुः स्यात् । कुजो भौमोऽरौ शत्रुगृहे षष्ठे स्यात् खे दशमे सितः शुक्रः स्यात् । एतादृशेऽभिषेकयोगे यो राजाऽभिषिच्यते स सदा सर्वकालं राजलक्ष्म्या मोदते । अयमेको योगः। सौरिसूर्यौ तृतीयायगौ स्यातां यथासंख्यं शनिस्तृतीये रविरेकादशे गुरुः खबंध्वोः खे

दशमे बंधौ चतुर्थे वा चेद्गुरुः स्यादेवंविधे योगेऽभिपिक्तस्य नृपस्य धरित्री पृथ्वी स्थिरा सदा हस्तगता स्यात् ॥ ४ ॥

इति श्रीदैवज्ञानंतसुत० प्रमिताक्षरायां दशमं राजाभिषेकप्रकरणं समाप्तम् ॥ १० ॥

अथ यात्राप्रकरणप्रारंभः ॥ ११ ॥

अथ यात्राप्रकरणं व्याख्यायते । तत्र किंचित्कार्यमुद्दिश्य देशांतरगमनं यात्रेति । सा द्विधा । "परविपये विषयार्थं गंतुर्यात्रा तु समरविजयाख्या । निखिलापरयात्रा या सामान्या सा भवेद्द्विधा ॥ कथिततिथिवासरर्क्षेष्वभिमतफलदा भवेच्च । सामान्या समराह्वया च यात्रा योगविलग्नक्षितीशयोगेषु ॥" इति । तत्र यात्राधिकारिणः प्रहर्षिण्याऽऽह–

यात्रायां प्रविदितजन्मनां नृपाणां दातव्यं दिवसमबुद्धजन्मनां च ॥ प्रश्नाद्यैरुदयनिमित्तमूलभूतैर्विज्ञाते ह्यशुभशुभे बुधः प्रदद्यात् ॥ १ ॥

यात्रायामिति ॥ प्रविदितं च्छायाघटिकादिना ज्ञातं जन्मलक्षणया तत्कालीनलग्नकुंडलिकास्थशुभाशुभग्रहसुचितशुभाशुभफलोदर्कज्ञानं येषां तेषां नृपाणां यात्रायां दिवसं दातव्यं यात्रादिनं देयमित्यर्थः । यदाह वराहः । " विदिते होराराशौ स्थानादिबलं ग्रहाणां च । आयुषि च परिज्ञाते शुभमशुभं यातुरिह वाच्यम् ॥ " इति । ननु यस्य जन्मकालो न ज्ञातस्तस्य कथं यात्रा स्यादित्यत आह । अबुद्धमज्ञातं जन्मकालो येषां तेषामपि प्रश्नाद्यैः पृच्छोपश्रुत्यादिभिरशुभशुभे विज्ञाते सति बुधो यात्रादिवसं प्रदद्यात् । कीदृशैः प्रश्नाद्यैरुदयो लग्नं निमित्तं शकुनादि एतदादीनि मूलभूतानि दानकारणानि येषां तैः । " प्रश्नोदयनिमित्ताद्यैस्तेषामपि फलोदये । " इति नारदोक्तेः ॥ १ ॥

अथ प्रश्नादेव फलं द्रुतविलंबितेनाह—

जननराशितनू यदि लग्नगे तदधिपौ यदि वा तत एव वा ॥ त्रिरिपुखायगृहं यदि वोदयो विजय एव भवेद्वसुधापतेः ॥ २ ॥

जननेति ॥ अत्र यद्यपि जन्मलग्नजन्मराशिज्ञानं वर्त्तते तथापि जातकोक्तशुभफलदग्रहदशानवगमादज्ञातजन्मत्वं ज्ञेयम् । अत एव राशिलग्नज्ञानाभावे यदि पृच्छति प्रश्नं वक्ष्यति जननं जन्म तत्संबंधिनी राशिलग्ने ते यदि प्रश्नलग्नगते स्याताम् । जन्मराशि जन्मलग्नं वा यदि प्रश्नलग्नं स्यात्तदा वसुधापते राज्ञो विजय एव । वा अथवा तदधिपौ लग्नगौ स्याताम् । जन्मराशिपतिर्जन्मलग्नपतिर्वा यदि प्रश्नलग्ने स्यात्तदापि राज्ञो विजय एव । अथवा तत एव ताभ्यामेव जन्मलग्नजन्मराशिभ्यामेव त्रिरिपुखायगृहं तृतीयषष्ठदशमैकादशानामन्यतमं गृहं यद्युदयो लग्नं स्यात्तदापि विजय एव शत्रुक्षयः स्यादित्यर्थः ॥ २ ॥

अथान्यं प्रश्नं मंजुभाषिण्याऽऽह—

रिपुजन्मलग्नभमथाधिपौ तयोस्तत एव वोपचयसद्म चेद्भवेत् ॥ हिबुके द्युनेऽथ शुभवर्गकस्तनौ यदि मस्तकोदयगृहं तदा जयः ॥ ३ ॥

रिपुजन्मलग्नभमिति ॥ रिपोः शत्रोः जन्मलग्नभं जन्मलग्नं जन्मराशिश्च तच्चेत्प्रश्नलग्नाद्धिबुके चतुर्थे द्युने सप्तमे वा स्यात्तदा राज्ञो जयो भवेत् । अथवा तयोः शत्रुजन्मलग्नराश्योरधिपौ स्वामिनौ प्रश्नलग्नाद्धिबुके द्युने वा स्यातां तदापि विजय एव । अथवा तत एव ताभ्यां शत्रोर्जन्मलग्नजन्मराशिभ्यामेवोपचयगृहं (३ । ६ । १० । ११) प्रश्नलग्नाद्धिबुके द्युने वा स्यात्तदापि जय एव । अथवा तनौ प्रश्नलग्ने शुभवर्गकः शुभग्रहाणां षड्वर्गकश्चेत्स्यात्तदापि जय एव । अथवा यदि मस्तकोदयाः शीर्षोदयराशयः । प्रश्नलग्न-

गताश्चेत्स्युस्तदापि जय एव । वराहः । " उदयमुदयपं वा जन्मभं जन्मपं वा तदुपचयगृहं वा वीक्ष्य लग्ने यियासोः । विनिहतमरिपक्षं विद्धि शत्रोरिदं वा हिबुकगृहसमेतं पृच्छतोऽस्तस्थितं वा ॥ " इति ॥ ३ ॥

अथान्यं प्रश्नं त्रोटकेनाह—

यदि पृच्छितनौ वसुधा रुचिरा शुभवस्तु यदि श्रुतिदर्शनगम् ॥ यदि पृच्छति चादरतश्च शुभग्रहदृष्टयुतं चरलग्नमपि ॥ ४ ॥

यदीति ॥ अत्र वसुधापतेर्जय इत्यनुवर्तते । यदि पृच्छितनौ प्रश्नलग्ने वसुधा भूमी रुचिरा स्यात् । अथवा यदि शुभवस्तु मंगलवस्तु मंगलवस्त्राभरणादि श्रुतिदर्शनगं श्रवणगोचरम् । दर्शनमत्र चाक्षुषम् । अथवा प्रष्टा आदरतो दैवज्ञं पृच्छति तदापि वसुधापतेर्जयः स्यादिति सर्वत्र व्याख्येयम् । अथवा चरलग्नं मेषकर्कतुलामकराख्यं यदि प्रश्नलग्नं शुभग्रहैर्दृष्टं युतं वा तदापि जय एव ॥ ४ ॥

अथाशुभफलदं प्रश्नं मालिन्याऽऽह—

विधुकुजयुतलग्ने सौरिदृष्टेऽथ चंद्रे मृतिभमदनसंस्थे लग्नगे भास्करेऽपि ॥ हिबुकनिधनहोराद्यूनगे वापि पापे सपदि भवति भंगः प्रश्नकर्त्तुस्तदानीम् ५

विधुकुजेति ॥ चंद्रमंगलयुक्ते लग्ने सौरिणा शनिना दृष्टे तदा प्रश्नकर्तुर्भंगः पराजयो नाशो वा स्यात् । अथ चंद्रे मृतिभमदनसंस्थे । चंद्रे अष्टमे सप्तमे वा लग्ने सूर्ये च सति एवंविधे योगे प्रष्टुः सपदि भंगः स्यात् । अव्ययानामनेकार्थत्वादपिशब्दो विपर्ययार्थः । तथा हि भास्करे मृतिभमदनसंस्थे चंद्रे लग्ने च सति । एवंविधे योगेऽपि प्रष्टुर्भंगः स्यात् । उक्तं च वराहेण । " चंद्रे सरुधिरे लग्ने भंगः सूर्यात्मजेक्षिते । द्यूने नैधनगे चंद्रे लग्ने याते दिवाकरे ॥

विपर्यये वा यातस्य यात्राभंगवधागमाः ।" इति । वाथवा पाप ग्रहे चतुर्थाष्टमलग्नसप्तमानामन्यतमस्थे सति प्रष्टुर्भंगः स्यात् ॥ ५ ॥

अथ प्रश्नलग्ने विशेषं भुजंगप्रयातेनाह—

त्रिकोणे कुजात्सौरिशुक्रज्ञजीवा यदैकोऽपि वा नो गमोर्कांच्छशी वा ॥ बलीयांस्तु मध्ये तयोर्यो ग्रहः स्यात्स्वकीयां दिशं प्रत्युतासौ नयेच्च ॥ ६ ॥

त्रिकोणे कुजादिति ॥ कुजान्मंगलात्त्रिकोणे नवपंचमे सौरिशुक्रज्ञजीवाश्चेत्स्युः । अथवा एकोऽपि वा सौरिशुक्रज्ञजीवानामन्यतमश्चेत्त्रिकोणे स्यात्तदाप्युद्दिष्टगमनं न स्यादेव । वाऽथवाऽर्कांच्छशी त्रिकोणे चेत्स्यात्तदाप्युद्दिष्टदिग्गमनं न स्यादेवं । तर्हि कस्यां दिशि गमनं स्यादित्यत आह । बलीयानिति । तयोरधुनोक्तोद्दिष्टदिक्प्रतिबंधकारकयोः ग्रहयोर्मध्ये यो ग्रहो बलवान्स्यात्सः स्वकीयां दिशं प्रत्युत सांप्रतं नयेत् ॥ ६ ॥

अथ योगांतरं मदलेखयाऽऽह—

प्रश्ने गम्यदिगीशात्खेटः पंचमगो यः ॥ बोभूयाद्बलयुक्तः स्वामाशां नयतेऽसौ ॥ ७ ॥

प्रश्नेति ॥ गम्यदिगीशात् गंतुं इष्टा या दिक् तस्या ईशः स्वामी प्रश्नलग्ने यत्र स्थाने स्यात्ततः पंचमे स्थाने यो ग्रहो बलयुक्तः बोभूयात् भवेत् । तदाऽसौ ग्रहः स्वामाशां दिशं नयते प्रापयति॥७॥

अथ यात्राकालं भुजंगप्रयातेनाह—

धनुर्मेषसिंहेषु यात्रा प्रशस्ता शनिज्ञोशनो राशिगे चैव मध्या ॥ रवौ कर्कमीनालिसंस्थेऽतिदीर्घा जनुः पंचसप्तत्रिरात्राश्च नेष्टाः ॥ ८ ॥

धनुर्मेषेति ॥ धनुर्मेषसिंहस्थे रवौ यात्रा प्रशस्ता शुभफलदा । शनिज्ञोशनो राशिगे मध्या । मकरकुंभमिथुनकन्यावृषतुलागते

[illegible]ा यात्रा मध्या स्यात् । कर्कमीनालिसंस्थे रवौ दीर्घा बहुकालसाध्या यात्रा न सफलेत्यर्थः । वराहः । "यात्राजसिंहतुरगोपगते वरिष्ठा मध्या शनैश्चरबुधोशनसां गृहेषु । भानौ कुलीरवृषवृश्चिकगेऽतिदीर्घा शस्तश्च देवलमतेऽध्वनि पृष्ठगोऽर्कः ॥" इति । देवलमतेऽध्वनि मार्गे सूर्यः पृष्ठगतत्वं तु वसंतराजोक्तभ्रमणवशेनेति केचित् । यथा । "दग्धा दिगैशी ज्वलिता दिगैंद्री धूमान्विता चानलदिक्प्रभाते । इत्येवमेव प्रहराष्टकेन भुंक्ते दिशोऽष्टौ सविता क्रमेण ॥" इति । अनेन भ्रमणप्रकारेण यस्यां दिशि यस्मिन् प्रहरे भ्रमणसंभवः सा दिक् सूर्यसंमुखोच्युते । तत्पंचमी दिक् सूर्यपृष्ठगतेत्युच्यत इत्याहुः । वस्तुतस्तु द्वादशराशिभ्रमवशेन यस्यां दिश्यर्कः स्थितः तां पृष्ठतः कृत्वा यायादित्यर्थः । यथा लग्नस्थेऽर्के पश्चिमां दिशं गच्छेत् । चतुर्थे दक्षिणाम् । सप्तमे पूर्वाम् । दशम उत्तरामित्यर्थः । यदाह देवलः । "लग्नस्थे वरुणाशां हिबुकस्थे दक्षिणां रवौ यायात् । सप्तमगे पूर्वाशां मेषूरणसंस्थिते सौम्याम् ॥" इति । एवं विदिक्ष्वपि ज्ञेयम् । यथा द्वितीयतृतीयस्थितेऽर्के नैर्ऋतीम् । पंचमे षष्ठे आग्नेयीम् । अष्टमे नवमे ऐशानीम् । एकादशे द्वादशके वायव्यां गच्छेदिति । अथ तारानिषेधमाह । जनुरिति । स्वजन्मनक्षत्राद्दिननक्षत्रं यत्संख्यं स्यात् तस्मिन्नवभक्ते अवशिष्टाः प्रथमसप्तमपंचमतृतीयाख्यास्ताराश्चेत्स्युस्तदा नेष्टा निषिद्धाः ॥८॥

अथ तिथ्यादिशुद्धिं भुजंगप्रयातेनाह—

न षष्ठी न च द्वादशी नाष्टमी नो सिताद्या तिथिः
पूर्णिमाऽमा न रिक्ता ॥ हयादित्यमित्रेंदुजीवांत्य-
हस्तश्रवोवासवैरेव यात्रा प्रशस्ता ॥ ९ ॥

न षष्ठीति ॥ सिताद्या तिथिः शुक्लपक्षप्रतिपत् । आसु तिथिषु यात्रा न प्रशस्तेत्यर्थः । नारदः । "षष्ठ्यष्टमीद्वादशिकारिक्तामा-

१ लग्नः ।

वर्जितासु च । यात्रा शुक्लप्रतिपदि निधनाय भवेदिति ॥ " ह ऽश्विनी आदित्यं पुनर्वसुः मित्रोऽनुराधा इंदुर्मृगः जीवः पुष्य अंत्यं रेवती हस्तश्रवणधनिष्ठाः एतैर्नवभिर्नक्षत्रैः । यात्रा प्रशस्तोत्तमा । मध्यानि निषिद्धानि च भानि वसिष्ठ आह । " तिस्रोत्तरावारुणनैर्ऋतेंद्रपूर्वात्रयं ब्राह्मभयुग्दशैवम् । मध्यान्यनिष्टान्यनलानिलेशद्विदैवचित्राहिमघांतकानि ॥ " इति । तिस्रोत्तरा इत्यार्षः संधिः । ननु वसिष्ठेन वारा उक्ताः । " सुरेज्यदैत्येज्यशशींदुजानां वाराश्च वर्गाः शुभदाः प्रयाणे । आदित्यभूसूनुशनैश्चराणां वाराश्च वर्गा न शुभप्रदाः स्युः ॥ " इति । अत्र कुतो नोक्ता इति चेत् नारदादिभिरनुक्तत्वात् । वसिष्ठादिभिरुक्तपापग्रहवारशूलनिषेधवैयर्थ्याच्च । दोषाधिक्यसूचनार्थं तदिति चेन्न । भिन्नकर्तृकेषु मुनिग्रंथेषु मुनिवचनानां वैयर्थ्यानर्हत्वादेवंविधा गतिरुचिता न त्वेककर्तृके ग्रंथे । तत्र हि पूर्वापरविरोधे अर्थांतरं वा कार्यम् । ग्रंथांतरेण सहैकवाक्यता वा कार्या । तत्रायं वसिष्ठवाक्यस्वरसः । तुहिनकरमंदवारे इति वाक्यात् पापग्रहवारनिषेधो गौण इत्यनुमीयते तत्र तस्य गतिस्त्वेवम् । यदा स्वजन्मराशेरुपचये यो ग्रहः शुभो वा अशुभो भवतु स सर्वदिक्षु हितः । परंतु शूलदिशो विहाय । यदा त्वनुपचयस्थः स तु कुत्रापि न हितः । यदाह राजमार्तंडः । " उपचयकरग्रहदिने शुद्धिः क्रूरेऽपि पापिनां भवति । सौम्येऽप्यनुपचयस्थे न भवति यात्रा शुभा यातुः ॥ " इति । तस्मान्नार्थो वारोक्त्येति तत्र नोक्ताः ॥ ९ ॥

अथ वारशूलं नक्षत्रशूलं च पृथ्वीच्छंदसाह—

न पूर्वदिशि शक्रभे न विधुसौरिवारे तथा न चाजपदभे गुरौ यमदिशीनदैत्येज्ययोः ॥ न पाशिदिशि धातृभे कुजबुधेर्यमर्क्षे तथा न सौम्यककुभि व्रजेत्स्वजयजीवितार्थी बुधः ॥ १० ॥